मार्गशीर्षपौषौ
वर्षम् – ७०
द्वितीयोऽङ्कः
विक्रमाब्दः २०७६
युगाब्दः ५१२१
५ दिसम्बर २०१९


ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–

प्रकाशन प्रत्येक माह की 1 तारीख



ISSN2249-698X

।। श्रीशः ।।

# भारती

## संस्कृत-मासपत्रिका

संस्थापकौ
स्व. उमाकान्तकेशवआप्टे ( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

**संरक्षकाः**

श्रीश्यामशरणदेवाचार्यः
स्वामी रामभद्राचार्यः
स्वामी अवधेशानन्दगिरिः
महन्त गोविन्दगिरिः
स्वामी राघवाचार्यवेदान्ती
स्वामी संवित् सोमगिरिः
महन्त प्रतापपुरी
महन्त किशोरपुरी
महन्त कैलाशशर्मा

**सम्पादकमण्डलम्**

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्रो. श्रीकृष्णशर्मा

प्रबन्धसम्पादकः
सुदामाशर्मा

सहसम्पादकौ
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

सहायकसम्पादकाः
प्रो. धर्मचन्दजैनः
डॉ. स्नेहलताशर्मा
डॉ. पवनव्यासः

**भारतीयसंस्कृतप्रचारसंस्थानम्**

अध्यक्षः
प्रो. शंकरप्रसादशुक्लः

उपाध्यक्षौ
डॉ. नाथूलालसुमनः
मो. : 9414443516
डॉ. नन्दसिंहनरूका

सचिवः
डॉ. सुधीरकुमारशर्मा
मो. : 9314032161

सहसचिवः
कृष्णकुमारशर्मा

व्यवस्थापकः
राजीवदाधीचः

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

मार्गशीर्षपौषौ
वर्षम् 70
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2076
दिसम्बर, 2019
अङ्कः -2
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

# विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | सम्पादकीयम् | प्रोफेसर श्रीकृष्णशर्मा | ४ |
| २ | विनायकसहस्रसिद्धे | राजेन्द्र मोहन शर्मा | ५ |
| ३ | वैदिकवाङ्मये ऋषिवशिष्ठः | डॉ. मीनू सिंह | ७ |
| ४ | सूक्ति-सुधा | डॉ. प्रेमचन्द्र रांवका | ८ |
| ५ | प्रियं भारतम् | पं. रमेशचन्द्रशर्मा | ९ |
| ६ | साँचीग्रामे | डॉ. हर्षदेवमाधवः | १० |
| ७ | बालकथा | डॉ. हर्षदेवमाधवः | ११ |
| ८ | सरसो वै आदित्यग्रहः | डॉ. रामनारायणः शास्त्री | १३ |
| ९ | संस्कृत समाचारः | प्रबन्धसम्पादकः | १६ |
| १० | वास्तुशास्त्रस्य परिचयः | मुकेशकुमारः पारीकः | १७ |
| ११ | संस्कृतभाषा राष्ट्रसंरक्षिका | सुरेन्द्रसिंह बैरवा | १८ |
| १२ | योगस्योपादेयता | लता राठौड़ः | १९ |
| १३ | व्याकरणदर्शने सृष्टिप्रकारः | विजय कुमार | २२ |
| १४ | भाषाधिगमप्रक्रमः | द्वारिका प्रसाद तिवारी | २४ |
| १५ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | २६ |
| १६ | अस्माकं गुरवः | वेणीमाधव गो. धर्माधिकारी | २८ |
| १७ | प्रेरकप्रसङ्गशतकम् | श्रीमती आराधना धर्माधिकारी | २९ |
| १८ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | ३० |
| १९ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३२ |


## पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**

**दूरभाषः 0141–2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)**

सम्पादकीयम्

# अद्यायोध्या नयाधीशा अयोध्या प्रतिभाति नः

...✍ प्रोफेसर श्रीकृष्णशर्मा

**अयोध्या मथुरा माया काशी काञ्ची ह्यवन्तिका।**
**पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः।।**

इत्यनेन सप्त मोक्षदायिन्यो नगर्यः प्रोक्तास्तत्रापि 'अयोध्या' प्राथम्येनोपवर्णिता। योद्धुं न शक्यते, या सा अयोध्या भवति, परं षोडशशताब्दीतो विंशतिशताब्दीं यावदियं मन्दिर-मस्जिदविवादेन युद्धस्थली सञ्जाताऽऽसीत्।

1885 ईशवीयाब्दतः 2019 खीष्टाब्दं यावत् 134 वर्षाणि व्यतीतानि न्यायालयेषु अयोध्याविवाद-निराकरणार्थम्। विभिन्नेषु न्यायालयेषु न्यायाधिपतयः श्रुतवन्तः प्रकरणमेतत्, किन्तु नेतृणाम् राजनीतिकवर्च-स्वलिप्सावशाद् अथवा राजनीतिकसदिच्छाया अभावात् साफल्यं नैव जातम्। षोडश-शताब्द्यां (1528 ई.) यवनशासने 'यावनधर्ममन्दिरम्' (Mosque-मस्जिद) अयोध्यायां हिन्दुपद्धतेर्निर्माणविशेषं ध्वंसयित्वा निर्मित-मासीदिति पुरातात्त्विकैरैतिहासिकसाक्ष्यैश्च संसाधितम्।

ततः प्रभृति 8-11-2019 दिनं यावत् 491 वर्षेषु नैकलक्षाः जनाः रामभक्ताश्च श्रीरामजन्मभूमिस्थानमुक्ति-प्रयासावसरे स्वप्राणान् तत्यजुः। स्वतन्त्रभारते शासका हिन्दुधर्ममन्दिरयावनधर्ममन्दिरयोर्विवादमपाकर्तुं प्रयतित-वन्तोऽपि दूषितराजनीतिकारणात् परस्परसहमतेरभावात् विवादसमाधाने असफला एव सञ्जाताः।

अधुना राष्ट्रहिताय दृढसङ्कल्पः सञ्चितशुभकर्म-प्रारब्धसंस्कारो विश्वस्मिन् लब्धयशस्कः श्रीनरेन्द्रमोदी-महोदयो भारतवर्षस्य प्रधानमन्त्रित्वेन शासकः। अस्यैव शासने राष्ट्रहिताय कश्मीरप्रान्ते 'अनुच्छेद-370' इत्यस्य निरस्तीकरणं सर्वथा रक्तपातशून्यं 05-08-2019 दिनाङ्के एकस्मिन्नेव दिने संवैधानिकरीत्या चाकचिक्येन सञ्जातम्। फलतः पाकिस्तानप्रायोजिता आतङ्कवाद-समस्या प्रायेण समाहिता।

अस्यैव शासनकालेऽधुना श्रीरामजन्मभूमिबाबरी-मस्जिदविवादसमाधानाय सौभाग्यशालिनो मुख्य-न्यायाधीशस्य श्रीरञ्जनगोगोईमहोदयस्य आध्यक्ष्ये न्याय-मूर्तीनां श्री एस.ए.बोबडे-डी.वाई. चन्द्रचूड-अशोकभूषण एस. ए. नजीरमहाभागानां पञ्चानां परमेश्वरतुल्यानामेकं संविधानपीठम् अनवरतं चत्वारिंशद् दिनानि यावत् हिन्दु-मुस्लिमपक्षकाराणां वाक्कीलानां तर्कान् अशृणोत्। सेवानिवृत्तिदिनाङ्कात् 17-11-2019 तः प्रागेव 9-11-2019 दिनाङ्के शनिवारे मुख्यन्यायाधीशः श्रीरञ्जनगोगोई महोदयः सदिच्छया प्रेरितो न्यायैकप्रणः सर्वसम्मतं संविधानपीठनिर्णयं श्रीराममन्दिरपक्षे श्रावितवान्।

ऐतिहासिकोऽयं निर्णयस्तथ्याधृतो, न केवलम् आस्थाविषयः। सम्यगुक्तं 'मुरारेस्तृतीयः पन्थाः' इत्येव ख्यातिं गतेन मुरारिकविनानर्घराघवे- **'यान्ति न्याय-प्रवृत्तस्य तिर्यञ्चोऽपि सहायताम्'** इति।(1.4)।

संविधानपीठस्यायं निर्णयः सन्तुलितो राष्ट्रविकासाय आधारस्तम्भः, सहानेनैव धार्मिकस्थलजनितविवादस्य पटाक्षेपोऽपि सञ्जात इति वयं मन्यामहे। अतश्चाद्य हे न्यायाधीशाः पञ्चन्यायमूर्त्तयः! 'अयोध्या' वस्तुत 'अयोध्या (योद्धुमशक्या)' जाता- इति नः- अस्मान् भारतीयान् प्रतिभातीति वः= युष्मान् वयमभिनन्दामो नुमश्च। न केवलमस्माकं भारतीयानामेव कृतेऽयं निर्णयोऽपितु विश्वस्य जगत आदर्शभूतः सौहार्दस्य चाधारशिलारूपः।

वस्तुतो नव-दिनाङ्कः नव (नूतन) वृत्तान्तमयः सञ्जातः। अस्मिन्नेव दिने महापुरुषस्य गुरुनानकदेवस्य 550 तमस्य प्रकाशोत्सवस्योपलक्ष्ये करतारपुरस्थपवित्र-सिखधर्मस्थले गमनार्थं गूढच्छन्नपथस्य (Karatarpur Corridor) समुद्घाटनं पाक-भारतवर्षयोः प्रधान-मन्त्रिभ्यां सञ्जातमिति प्रसीदामो वयम् 'सर्वे भवन्तु सुखिनः' इति च कामयामहे।

# विनायकसहस्रसिद्धे

( गताङ्कादग्रे )

❑ पं. राजेन्द्रमोहनशर्मा

विनायकस्य भाले चिन्तारेखाः समुत्पन्नाः। रत्नमालो विनायकं पश्यन्नवदत् ''वयं चिन्ताग्रस्ता भूत्वा समस्याया समाधानं कर्तुं न शक्नुमः।'' समुचितमिदं भविष्यति यद्वयं शीघ्रमेवास्मद्दूतान् मित्राणामधिपतीनां चा पार्श्वे प्रेषयामः। विशेषरूपेण तेषु क्षेत्रेषु ध्यानं दातव्यम् यत्र वयं जलराशेः उपहारं यच्छामः। रत्नमालस्य प्रस्तावं तत्कालं मयूरेशोऽन्वमोदयत्। तस्मिन्नेव क्षणे विनयोऽपि उदतिष्ठत्।

उभौ दायित्वं स्वयं स्वीकुर्वन्नवदताम् दिनत्रयाणां समयोऽस्मभ्यं दातव्यः। आवां निश्चितमेव सफलतां लब्ध्वा समागमिष्यावः। विनायकः शिरः कम्पनेन स्वीकृतिं प्रायच्छत्।

रणनीतिनिर्मातृसभा अनेन निर्णयेन सह विसर्जिताऽभवत् यत् शत्रुभ्यः आक्रमणाय समयो न प्रदेयः। अतः अद्यैव निशीथे गजदलं निद्रानिमग्नं शत्रुदलं रुन्धन् अग्रे गत्वा भीषणारण्ये विलुप्तं भवेत्। प्रातः सूर्योदयेन साकमेवाश्वदलं शत्रुषु प्रहरिष्यति। शेषे शत्रुभिः पदातिदलं योत्स्यति। शत्रुदलं संहर्तुं जयघोषेन सहोच्चशिखरेषु प्रस्थानमकरोत् गजदलम्।

गजारूढः प्रत्येकः सैनिकः भालकृपाणखड्गलोह-दण्डमुद्गरपरशुरज्जुप्रभृति शस्त्राणि नीत्वा उपाविशत्। तेषां स्कन्धे तूणीरसहितं धनुरपि सज्जितोमभूत्। पञ्चशतगजानामयं समूह अग्रे प्राचलत्। विनायकस्य गुप्तदलेन या प्रारम्भिकी सूचन प्रदत्ता तदनुसारं शत्रुदलं प्रजापतिराज्यात् पञ्चाशत्योजनदूरे गहने अरण्ये अतिष्ठत् (स्थितः आसीत्)। प्रायः दशयोजनगमना-नन्तरं सहसा आशुतोषाश्रमस्य प्रमुखो ऋषिः सुमन्तू सम्मुखे आगच्छन् दृष्टिपथमागतः। जयघोषः दूरत एव तं पर्यचिनोत् निकटे समागतं तं जयघोषः प्राणमत्।

आशीर्वादं प्रयच्छन् समन्तू अवदत्। वत्स अहं जानामि यत् भवान् प्रजापतेः सहायतायै त्रिपुरासुरस्य नेतृत्ववर्ती शुत्रुसेनां विनाशयितुम् अग्रे सरति परन्तु मयाधुना परिज्ञातं यत् त्रिपुरासुरमस्य सेना स्थानपरिवर्तनमकरोत्। संभवतः ते विनायकस्य रणनीतिमजानन्।

मम परामर्शो विद्यते यत् भवान् स्वकीयं दलं दक्षिणदिशातोऽग्रे प्रेषयतु। तस्मात् स्थानात् निम्नमार्गे समागमनसमकालमेव पञ्चाशत् योजनदूरे शत्रुसेना युष्माकं दृष्टिपथमायास्यति। युष्माकं गजदलं शिखरात् अवतरिष्यति अतः तस्य गतिरपि तीव्रा भविष्यति ततश्च शत्रुदलं न सम्भलिष्यति।

जयघोषः महर्षिसुमन्तुं प्राणमत् धन्यवादं प्रायच्छत् स्वगजदिशामपि परावर्तयत्। विवशो विनायको युद्धभूमिमध्ये सुखासनेनोपविश्य मल्हार-मगायत् मल्हारमुद्रायामालापमारभत। ततः घटिकै-कानन्तरं मेघाः समागच्छन् गगने। अभ्यासजनितगीतसाधनायाः स्वरान् साधयन् यदा तीव्रगत्या मल्हारमालपत् तदा मन्ये इन्द्रदेवः स्वकीयान् सर्वान् वारिदान् संपूर्णजलमत्रैव प्रक्षेप्तुमादिशत्। चतुर्षु घटिकासु पूर्णं काननं क्लिन्नं संजातम्। पूर्णरूपेणाग्निः शान्तः संजातः। जाते वृष्टिविरामे विनायको नेत्रे उन्मीलयत्, स अपश्यत् यत् सम्पूर्णं हिमक्षेत्रं जले निमग्नमभवत्। किञ्चित्-कालानन्तरं वृद्धो नागः कालपाणिरुत्थाय विनायकं साग्रहमवदत् भवन्तः अनेन मार्गेणाग्रे गन्तुं तत्पराः सन्ति नाहं जाने भवतां किमुद्देश्यम्? कुत्र च गच्छन्ति। परन्तु अहमनुभवामि यत् किमपि महल्लक्ष्यमादाय भवन्तोऽ-ग्रेसरन्ति। अतो यदा कदापि भवन्तोऽस्माकं सहयोगस्यावश्यकतामनुभवेयुस्तत्कालमेवास्मान् सन्दिशन्तु। अस्माकं सविधे सन्देशप्रेषणाय सरलः

सुगमश्चोपाय: भवत्सहचरो मूषको विद्यते। स भूमितरंगैरस्मान् सन्देक्ष्यति वयं च तत्क्षणमेव सहायतायै समुपस्थास्याम:। भवतां दलेन सहअहं पञ्चविंशति स्वकीयसहचरान् प्रेषयामि भवतां शक्तिसम्मुखे नेदं किमपि। पुनरपि मार्गे यदि इमे अस्माकं सहचरा भवतां कार्यं सम्पादयेयुस्तर्हि अस्माकं सौभाग्यं भविष्यति। विनायको हसित्वा स्वीकृतिं प्रायच्छत्। रात्रिसमय: संजात: अत: कालपाणिराग्रहं चकार यत् रात्रिविश्राम किञ्चिद्दूरे पताकासागरस्य तटे कुर्वन्तु भवन्त: रात्रिरधिका जाता भवतां गणा: पशवश्च श्रान्ता: सन्ति। विनायक: एकवारं निषेद्धुं शिरोऽ-कम्पयत् परन्तु कालपाणेराग्रहमन्ते स्वीचकार।

स्वदलेन सह विनायक: पञ्चयोजनमग्रे गत्वा पर्वतस्योपत्यकां शिश्रिये। तत्रत्य: परिवेशोऽत्यन्तं मनोहारी अविद्यत। पर्वतशृङ्खलाभि: परिवृतो मध्ये स्वच्छजलराशिपरिभृत: पताकासागरो वीचिभिर-क्रीडत्। समुन्नतैर्विशालदेवदारुवृक्षै-परिभृतो लता-पताकानां सागर: शोभतेस्म। विनायक: इममद्भुतं दृश्यं दृष्ट्वा नन्द। सर्वे विनायकसहचरा अपि ननन्दु:। य: कोऽपि दृश्यमिदमपश्यत् सोऽप्यत्यन्तं ननन्द। एष सम्पूर्ण: समूहो घटिकाद्वयं यावदिदमद्भुतं दृश्यम-पश्यत्। मन्ये धात्राऽत्यन्तेन शान्तेन चेतसा क्षेत्रमिदं-रचितम्। परितो नमिता: पर्वतशृङ्खला: मण्डलाकारे छत्रमरचयन्। निर्मलजलस्य पारदर्शिताऽद्भुताऽविद्यत। गगने विचरन्तो खगा: इत्थं प्रतीयन्तेस्म मन्ये इमे जलाभ्यन्तरत: समुत्पत्य गगने जिगमिषन्ति।

विनायको निश्चयं चकार यत् ते सहस्रस्निग्ध-जलराशिपूर्णे सरोवरतटे एव विश्रमिष्यन्ति। किञ्चित् क्षणानन्तरमेव विनायकदलसदस्यास्तत्रैव स्थातुं प्रवृत्ता: संजाता:। आवासाय वस्त्ररचितानि-अस्थायि-वासगृहानरचयन्। दलेन सह चलन्तोऽश्वा: मोचिता:। अद्य चिरकालानन्तरमश्वा अपि पूर्णरूपेण स्वतन्त्रा: संजाता:। अश्वदलनायकस्तान् विचरितुं प्रेषयन्नवदत् गच्छन्तु प्रकृतेरानन्दमनुभवन्तु हरितघासेन स्वोदरं पूरयन्तु शीतलं जलं पिबन्तु च। विनायक: सर्वप्रथमं श्याममृगचर्म शिलाखण्डे एकस्मिन्नातनोत्। पद्मासने समुपाविशच्च। घटिकानन्तरं विनायक: किमत्र वयं दीर्घकालं यावत् स्थास्याम:? न जाने मूषक: इत्थं परामर्शयत्-अथवाऽऽग्रहोऽविद्यत परन्तु विनायको मन्दस्मितं विधाय समाधिलीनोऽजायत।

सूर्यस्याऽश्वानां पादचापं श्रुत्वा विनायकस्य ध्यानभङ्गोऽ जायत अष्टहोराया: समाधेरनन्तरं विनायक उच्चै: ऊँ शब्दमुच्चचार विनायकश्चकित: संजात: यदा स ऊँ शब्दस्य ध्वनि: दिग्भ्य: पौन:पुन्येन समागच्छत्। इत्थं प्रतीयतेस्म मन्ये सम्पूर्ण गगनमेवोम्मन्त्रं जपति। उन्नतपर्वतशृङ्खलाया: प्रत्येक विनम्रकोणत: एकनाम-गतोऽपरभागात् संघट्य छत्राकारशिखरमभ्रमत् पुन: स एव क्रम: सागरोऽपि समारेभे। ध्वनिनां निरन्तरावृत्ति-नादमाभाषतेस्म। सम्मोहितस्य विनायक-स्यानन्दस्य पारावारो नासीत्। किञ्चित् कालानन्तरं मन्दं प्रयाते ध्वनौ विनायकस्तथैवोच्चै: ऊँ कारमुच्चचार तदा पुनस्तथैव ध्वनि: प्रासरत्। सन्ध्यासमयस्तथैव व्यतीयाय।

ज्योत्स्नाया: शीतलपरिवेशे विनायक: स्वसहचरै: सह भोजनायक: पङ्क्तिबद्ध: समुपाविशत्। अद्य भोजनमपि विशिष्टं सुस्वादयुक्तं विशिष्टखाद्यसामग्रि-पूर्णमासीत्। परम्परागता कापि खाद्यसामग्री भोजने नाविद्यत शुष्कदूर्वाया: चूर्णै: वृक्षाणां त्वक् पत्राणि ताडीदुग्धेन रसपूर्णे गठीले मधुराणि फलानि भोजने सम्मिलितान्यासन् कदलीपत्राणां पत्रावलि: हरित-पत्राणां द्रोणा: स्वयं प्रकृते: प्रतिनिधित्वमकार्षु: । विनायक: पाकशालानायकाय धन्यवादमजिज्ञपत्। स्वयं च सागरतटे पर्यभ्रमत्।

**( प्राचार्य )**
**पुरानी बस्ती, चांदपोल बाजार, जयपुर**

# वैदिकवाङ्मये ऋषिवशिष्ठः

❑ डॉ. मीनू सिंह

सायणाचार्यः गत्यर्थक 'ऋष्' धातोः ऋषिशब्दस्य व्युत्पत्तिं मन्यते। ऋष् 'इन्' प्रत्ययेन व्युत्पन्नः मन्यते- **''इन्प्रत्ययान्त ऋषि शब्द ऋष्यंधकेतिनिपातनात्''।** तैत्तिरीय आरण्यक (2.9) अनुसारेण ऋषि शब्दः ऋष् धातोः निष्पन्नः अभवत्- **''अजान ह वै पृश्नीस्तप स्यनामात् ब्रह्म स्वयंभ्वानर्षत् तदृषयो, भवन्''।** यास्कः दर्शनार्थक ऋष् धातोः ऋषिशब्दस्य व्युत्पत्तिं मन्यते।

सर्वानुक्रमणिकानुसारेण ऋग्वैदिकसूक्तानां 439 ऋषयः सन्ति। एते प्रायः मन्त्राणां द्रष्टारो मन्यन्ते- ''ऋषयो मन्त्रद्रष्टारः'' (निरुक्त 1.10)। निघण्ट्व-नुसारेण (1.20) **''साक्षात्कृतधर्माणः ऋषयः बभुवुः''** अर्थात् धर्मस्य साक्षात्कर्तारः। मनुस्मृत्याः मतेन **''ऋषयः संयतात्मानः''।**

**वसिष्ठः** - वसिष्ठशब्दस्य व्युत्पत्तिः वस् धातोः अभवत्। सु शब्दे इष्ठन् प्रत्ययं योजयित्वा वसिष्ठः इति शब्दः निष्पन्नः भवति। एतस्यार्थः सर्वोत्तमः भवति। शौनकीय अथर्ववेदानुसारेण (6.21.2) **''वसिष्ठ वसूनामन्यतमं मुख्यम्''। वसवः अष्टौ सन्ति पार्थिव अग्नेः विभिन्नरूपाणि सन्ति।** अग्नेः कृते (ऋग्वेदः 7.1.8) कथयति **''आ यस्ते अग्न इधते अनीकं वसिष्ठ शुक्र दीदिवः पावकः''** अन्यत्रापि कथ्यते यत् **''होता विदानः त्वेषो दीदिवां सुदक्षः अदब्ध प्रमतिर् वसिष्ठः सहस्रं भरः।''**

शतपथब्राह्मणस्य मतेन **''प्राणौ वै वसिष्ठ ऋषिः यद्वै नु मो वसति तेनो एव वसिष्ठः''** अर्थात् सर्वेषु प्राणेषु मुख्यतमो विद्यते। सर्वप्राणेषु प्रमुखतया स्थितः **''वसिष्ठ ऋषिः प्रजापति गृहीयता''**।

वसिष्ठस्य अर्थः 'सर्वोत्तमः' सर्वोत्तम-वसुः वा सायणमतेन ''वसिष्ठः अतिशयेन निवास हेतुः'' यत अतिशय निवासस्य हेतुः वर्तते। स्थायिनिवासस्य कारणम् अस्ति। देवानां स्वस्वस्थाने निवासहेतुत्वादग्नेः वसिष्ठत्वम्।

**वसिष्ठ जन्म-**

**उतासि मैत्रावरुणो वसिष्ठोर्वश्या**
**ब्रह्मन्मनसोऽधि जातः**
**प्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वेदेवाः**
**पुष्करे त्वाऽददन्त।। ( ऋग्वेदः 7.33.11 )**

ऋग्वेदे वसिष्ठः मित्रावरुणयोः सम्मिलितपुत्रः कथ्यते। एकस्मिन् भिन्नमन्त्रेऽपि **''मित्रावरुण यदपश्यतां त्वा वसिष्ठः''** (ऋग्वेदः 7.33.10) वसिष्ठस्य जन्मोल्लेखः मिलति। यत्र मित्रावरुणेन **''वसिष्ठोर्वश्यां ब्रह्मन्मनसोऽधिजातः''** उर्वश्याः दर्शनेन **''कुम्भे रेतः सिषिचतुः समानम्''** (ऋग्वेदः 7.33.13) कुम्भे 10 वसिष्ठस्य अगस्त्यस्य जन्म सिध्यति। एतेषां मन्त्राणामाधारेण वसिष्ठस्य जन्मरहस्यं ज्ञातुं न शक्यते। अतः वयं वक्तुं शक्नुमः यत् तेषां जन्म रहस्यमयं वर्तते।

ऋग्वेदस्य सप्तममण्डलस्य श्रेयः वसिष्ठायैव दीयते- **''सप्तममण्डलं वशिष्ठः अपश्यदिति उक्तत्वात् मण्डल-द्रष्टा वसिष्ठ ऋषिः''**।

**अग्निं नर इति त्वेतत्सप्तम मण्डले प्रति।**
**ऋषिर्वसिष्ठो विज्ञेयो मित्रावरुणयोः सुतः।।**

वशिष्ठस्य नाम सप्तऋषिषु गोत्रऋषिषु च प्राप्यते। ऋग्वेदे वशिष्ठः सर्वाधिकप्रसिद्धपुरोहितेषु अन्यतमो मन्यते। यस्य कारणात् नृपतिः सुदासः अवश्मेधयज्ञं कृत्वा सम्पूर्णभूमण्डले विजययात्राम् अकरोत्-**एतेन ह वै ऐन्द्रेण पैजवनम् अभिषिषेच। तस्माद् उ सुदाः पैजवनः समन्तं सर्वत्र पृथिवीं जयन् परीयाय अश्वेन च मेध्येन ईजे** (शतपथ ब्राह्मण 8.21)। वायुपुराणे (2.10.8) वसिष्ठः ऋषिषु श्रेष्ठ उक्तः- ''**ऋषीणां च वरिष्ठाय वसिष्ठाय महात्मने**''। ऋग्वेदे सुविख्यातस्य निम्नमन्त्रस्य रचयिता वशिष्ठ एव मन्यते-

**त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्।**
**उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात्।।**
**( ऋग्वेद 7.59.12 )**

काठकसंहितायां निम्नमन्त्रेण- ''ऋषयो वा इन्द्रं प्रत्यक्षं नापश्यन् तं वसिष्ठः प्रत्यक्षम् अपश्यत्'' इत्यनेन एतदेव सिध्यति यत् अन्येषां ऋषीणामपेक्षया वशिष्ठ एव श्रेष्ठः। रामायणे पुराणादिषु च वशिष्ठः ब्रह्मर्षिरित्युक्तः। ऋग्वेदोक्तः वशिष्ठः परवर्तिसाहित्ये चोल्लिखितः एका एव व्यक्तिः एतावान् दीर्घजीवी भवितुं नार्हति। राज्ञः सुदासस्य रामचन्द्रस्य च समये सुमहान् समयान्तरालो वर्तते। श्रुतिषु ''शतायुर्वै पुरुष'' इत्युक्तम्। तपोयोगादिप्रभावात् सामान्यनियमेऽस्मिन् अन्तरमवश्यं दृश्यते, तथापि सीमन्येव न तु निरवधि। अत एतदवगन्तव्यं यत् परिवर्तिसाहित्ये समुल्लिखितो वशिष्ठः मूलवशिष्ठस्य वंशजोऽवर्तत, इति शम्।

**स्वेज फार्म सोडाला, जयपुर**

# सूक्ति-सुधा

❑ **डॉ. प्रेमचन्द्र रांवका, पूर्व आचार्यः**

**( 15 वीं.श. आचार्य सकलकीर्ति रचित सुभाषित रत्नावलीतः )**

**कर्मायत्ते जने शत्रो रागद्वेषमदान्विते।**
**मानक्रोधादिकं त्यक्त्वा माध्यस्थ्यं भज मुक्तये।।**

- जो मनुष्य कर्म के अधीन होने से राग, द्वेष और अहंकार से युक्त है, ऐसे शत्रुजन पर मान क्रोधादिक छोड़कर मोक्ष के लिये माध्यस्य भाव को धारण करो।

**ज्ञान चरित्रसद्धर्मे गुरुश्रावककारणे।**
**चैत्ये चैत्यालये कार्ये पक्षपातं सदा कुरु।।**

- ज्ञान, चारित्र रूप समीचीन धर्म, गुरु, श्रावक (सद् गृहस्थ)।, प्रतिमा और मन्दिर के कार्य के लिये सदा पक्षपात (प्राथमिकता) बरते।

**ज्ञाने तपसि धर्मे च जिने शास्त्रे गुरौ सदा।**
**सेवा हिताय कर्तव्या स्वस्य सर्वसुखप्रदा।।**

- आत्महित और सर्व सुखों को देने वाली ज्ञान, तप, धर्म, जिनदेव, शास्त्र और गुरु की सदा सेवा करनी चाहिये।

**संतोषो न च कर्त्तव्यस्तपोधर्मादिके सदा।**
**सज्ज्ञानपठने दाने पूजा सद्गुरु सेवने।।**

- तप, धर्म आदि में सम्यक् ज्ञान के पठन-पाठन में, दान, पूजा और सद्गुरु जनों की सेवा से कभी सन्तोष नहीं करना चाहिये।

**सतवे त्वं कुरु मित्रभावमतुलं सिद्धान्ततत्त्वान्विते,**
**जीवे सद्गुणधर्मरत्नसदने रागं परं मुक्तिदम्।**
**क्लिष्टे दुःखवियोगरोगसहिता, सारां कृपां सिद्धिदां।**
**रागद्वेषमदान्वितेऽतिविषमे माध्यस्थ्य भावं च भोः।।**

- हे भाई, तुम सिद्धान्त के रहस्य से युक्त जीवों पर अनुपम मैत्री भाव रखो - सद्गुण तथा धर्म रूपरत्नों के घर स्वरूप गुणीजनों पर मुक्ति प्रदाता उत्कृष्ट अनुराग कर, दुःख वियोग तथा रोग सहित, क्लेश युक्त जीवों पर सिद्धि करने वाली श्रेष्ठ दया करो तथा राग-द्वेष अहंकारी जीवों पर माध्यस्थ्य भाव रखो।

**22, श्रीजीनगर, दुर्गापुरा, जयपुर**

# प्रियं भारतम्

❑ पं. रमेशचन्द्रशर्मा
व्याख्याता

शुभ्रा च देवी प्रियभारते च, सरस्वती सा विदधातु प्रज्ञाम्।
नमामि शुक्लां वरदां च देवीम्, सदैव कल्याणकरीं शुभां च।।40।।

श्री रामचन्द्रो हनुमान् च सीता, शिवश्च गिरिजा गणनायकश्च।
जनाश्च सर्वानपि पूजयन्ति, देवाननेकान् प्रियभारते च।। 41।।

प्रिया अयोध्या प्रियरामचन्द्रः, सीता च माता भरतश्च बन्धुः।
गुरुर्वशिष्ठश्च सदैव गंगा, धन्यश्च देशः मम भारतम् च।। 42।।

देशः मदीयः खलु स्वर्गतुल्यः, वसन्ति यत्रापि च देवदेवाः।
आदाय पूजां च कृतां प्रजाभिः, यच्छन्ति सर्वाणि फलानि तेभ्यः।।43।।

सौहार्द्रभावं भवति प्रजानाम्, धर्मान् च सर्वान् प्रति आदरं च।
सदास्ति न्यायः प्रियमाननीयः, देशे सदैव प्रियभारते च।। 44।।

रामः तथैवापि हि पूजनीयः, यथा च पूज्यः पुरुषोः रहीमः।
न्यायश्च मुख्यः मम भारते च, तन्त्रे प्रजानामपि धीमताम् च।।45।।

ईशुमसीहः गुरुनानकश्च, देवाश्च धर्माश्च भवन्ति भिन्नाः।
परं समानश्च भवेत् समादरः, देशे मदीये प्रियभारते च।। 46।।

प्रणमामि सदा गिरिजाचरणम्, भवतापहरं सुखदं स्मरणम्।
जय पापविनाशक पाहि विभो, शशिशेखर शंकरदेव हरे।। 47।।

जय शैलसुते जय भैरव हे, गणनायक नाथ दयां कुरु हे।
वितनोतु शुभं वटुकश्च सदा, मम देशजनाः सुखिनश्च सदा।।48।।

नहि दीननराः नहि हीननराः, बहुकर्मयुताः मम देशजनाः।
सुखिनश्च भवन्तु सदा कृषकाः, बहुधान्ययुता वसुधा सुखदा।।49।।

विहरन्तु सदा सरसाः च सुराः, धनधान्ययुताः बसुधाः कृषकाः।
तोटक यमुना सरिता सरयू च सदा, सलिला च वहन्तु सदा अमला।।50।।

माहात्म्यमत्रास्ति चिरं नदीनाम्, गंगापि मोक्षं प्रददाति नित्यम्।
स्नात्वा जनाः मोक्षमवाप्नुवन्ति, वहन्ति नद्यः प्रिय भारते च।। 51।।

गंगे नमस्तेऽस्तु च गौरवर्णे, विशालकाये सुरलोकसेविते।
व्रतेन दानेन च तर्पणेन, भवन्ति लोकाः खलु पापमुक्ताः।। 52।।

ज्येष्ठे दशम्यां भुवि शुक्लपक्षे, जातेति गंगादशमी च ख्याता।
अस्मिन् दिने स्नानमहोत्सवं च, कुर्वन्ति पूजादिकदानकार्यम्।। 53।।

गंगा ममाङ्गानि पुनातु नित्यम्, विराजते या मकरासने च।
ददाति मोक्षं शरणागतेभ्यः ददात्यपि स्वर्गसुखं पृथिव्याम्।। 54।।

भागीरथी या हरते सदैव, गंगा च माता दशपातकानि।
ज्येष्ठे दशम्यां व्रतपूजनादिकम्, अस्याः तटे यश्च करोति तस्य।। 55।।

गंगैव माता च पितापि गंगा, सदैव माता च ददाति पुण्यम्।
धर्मार्थकामानपिमोक्षमाशु, ददाति सर्वाणि सुखानि नित्यम्।।56।।

पुरा महेन्द्रैः न कृतं कदापि, सदैव गंगाजलनिर्मलाय।
जनाश्च स्वार्थाय मलं क्षिपन्ति, तेनैव गंगा समला च जाता।। 57।।

हे राजराजेन्द्र नरेन्द्रदेव, कथं भवेत् निर्मलनीरयुक्ता।
विचार्य इत्थं नवयोजनाभिः, गंगा च स्वच्छा विमला सुकार्या।।58।।

गंगा पवित्रा विमला च स्वच्छा, धर्मार्थकामानपि मोक्षदात्री।
त्रितापहारा च जनाः प्रसन्नाः, यस्यां हि अन्ते ससुखं स्वपन्ति।।59।।

106, ग्रीनपार्क, बैनाड़ रोड़
दादी का फाटक, झोटवाड़ा, जयपुर-12

---

सादरमनुरोधः

## जन्मशताब्दीविशेषाङ्कः

अप्रेल 2020, मासे भारतीमास-पत्रिकायाः संस्थापकानां स्वर्गीय-श्रीगिरिराजशास्त्रि (दादाभाई) महोदयानां जन्मशताब्दी-विशेषांकः प्रकाशयिष्यते। दादाभाईमहोदयस्य स्मृतिविषयकानां संस्कृतलेखानां 31 जनवरी 2020 पर्यन्तं सम्प्रेषणाय भवन्तोऽनुरूद्ध्यन्ते।

## पाठकसम्मेलनम्

भारतीमासपत्रिकायाः पाठकसम्मेलनं 5 जनवरी, 2020 दिनाङ्के त्रिवादने जयपुरस्थ-भारती-भवने समारप्स्यते। सम्मेलनेऽस्मिन् समुपस्थातुं भवन्तः सादरम् आमन्त्र्यन्ते।

नूतनकाव्यपृषताः

# साँचीग्रामे

❑ डॉ. हर्षदेवमाधवः

भदन्त शारिपुत्र !
भदन्त मौद्गल्यायन !
युवयोरस्थिसंग्रहयुक्ते स्तूपे
स्थितोऽस्मि !
साँचीस्तूपद्वाराद्
दु:खसमुदाय: प्रविशति मयि
'सम्बोधि' अतिथिगृहस्य
शौचगृहे
मलावरोधपीडा,
मूत्रकृच्छ्रव्याधि:,
रक्तचापचिन्ता, पत्नीकुक्षिवृद्धिसन्ताप:,
शर्कराधिक्योपाधि:,
भोजनसंयमदु:खम्,
पुत्रशालाशुल्कव्यवस्था-मन:शल्यम्।
शीतप्रकोपपीडितशरीररक्षणव्यसनम्
अपि च....
दु:खानि
कति कति
कतिविधानि... कीदृशानि...
कुत: कुत आयाति
न गच्छन्ति, स्वाधीनीकुर्वन्ति-
स्वपितृगृहं मत्वा
निवसन्ति मयि।
दु:खचतुष्टयं वीक्ष्य
पलायनं कुर्वन्तं
सिद्धार्थं चिन्तयित्वा
तस्मिन्
करुणा जायते...।

लक्षं दु:खानां
प्रतिदिनमभिद्रवति
एकं निष्कासयितुं शक्तो भवामि
तदैव
अन्यत्प्रविशति वृन्देन।
दु:खैस्सह युध्ये
दु:खानि पराजेतुं प्रयते
दु:खदंष्ट्राभिरानन्दं मे
मृगयामि-
एतदेव मे महा-वीरत्वम्।
सहसैव
'वाट्स-एप' सन्देशं पठामि
मित्रवर्यो हरिरामशर्मा चोर्या।
दिवं गत:। इति
युवां पश्यतम्
दु:खानि मां प्रत्यभिद्रवन्ति।
अधुनापि तथापि
मम श्रद्धा
मयि वर्तते,
न पलायने.... ।
अहमानन्दमन्वेष्टुमागत:,
न दु:खेभ्य: पराजयं
प्रासुम्।
अत एव
स्तूपे दु:खानि निधाय
प्रतिनिवर्ते पुनरपि।

**8, राजतिलक बंगलो,**
**आबादनगरसमीपे, बोपल, अहमदाबाद-58**

बालकथा

# राजकुमारः योग्यां कन्याम् अन्विष्यति

❑ डॉ. हर्षदेवमाधवः

गुर्जरप्रदेशस्य राज्ये सिद्धपुरं नाम नगरं वर्तते। सिद्धपुरं प्राचीनकाले गुर्जरस्य राजधानी आसीत्। तत्र मनोहरसिंहः नाम राजा आसीत्। तस्य पुत्रः रूपसिंहः आसीत्। रूपसिंहः नाम्नः सदृशः अतीव रूपवान् आसीत्। रूपसिंहः सर्वगुणसम्पन्नः विद्यावान्, शूरवीरः सर्वकलासु निपुणः अपि आसीत्। स महता श्रमेण सर्वविद्याः अधीतवान्। स्वस्य कौशलेन कलासु कौशलम् आप्तवान्। पित्रोः संस्कारेण सः गुणान् प्राप्तवान्। यदा सः षोडशवर्षीयः अभवत् तदा सः चिन्ताम् अकरोत् 'अहं कथं गुणवत् कलत्रं प्राप्नुयाम्' अन्ये ये कन्यां दर्शयन्ति तस्यां गुणाः भवेयुः वा न भवेयुः। किं कुर्याम्? इति विचिन्त्य सः व्यग्रः अभवत्। सः कन्यानां परीक्षणं कर्तुं व्यचारयत्। गुर्जरराज्यं समृद्धम् आसीत्। मनोहरसिंहः अपि शक्तिमान् सर्वं कर्तुं समर्थः आसीत्। तथापि रूपसिंहः शास्त्रेषु स्त्रीविषयकं ज्ञानम् अजानात्। राजपुरोहितः अन्ये च रूपसिंहाय राजकुमारीणां परिचयं प्राप्य रूपसिंहं दर्शयन्ति स्म।

रूपसिंहः कन्यां प्रत्यक्षं मिलितुं वदति स्म। रूपसिंहः कन्यां वीक्ष्य सामुद्रिकज्ञानेन कन्यायाः लक्षणानि अजानात्। किन्तु तां निषेधयितुं सः अवदत् 'मम राज्यं तु लघुकम्। त्वं तु महतः साम्राज्यस्य राज्ञी भवितुं योग्या असि।' सा कन्या स्वात्मनः गौरवम् अनुभूय रूपसिंहं वरयितुं न ऐच्छत्।

एकवारं मालवदेशस्य कन्यार्थं सन्देशः आगतः। रूपसिंहः मालवदेशस्य राजकन्यां दृष्ट्वा अजानात् यत् सा अतीव गर्विष्ठा वर्तते इति। अतः सः तां राजकन्याम् अपृच्छत्, 'अहं भोजनस्य रसिकः। त्वं भोजनस्य पाककलां जानासि किम्? त्वं मासे एकवारं मां तव हस्तस्य पक्वं भोजनं कारयिष्यसि।'

राजकुमारी अवदत्, 'अहं पाककलां न जानामि। अहं तु प्रातःकाले दशवादने शयनत्यागं करोमि।'

एकदा चित्तौडदेशस्य राजकन्यां वीक्षितुं सः अगच्छत्। रूपसिंह अपृच्छत्, 'अहं भ्रमणस्य रसिकः। अरण्ये स्वैरविहारं कर्तुं मम व्यसनम्। त्वं मया सह भ्रमणं करिष्यसि किम्?'

चित्तौडदेशस्य राजकन्या अवदत्, 'अहं तु यानेन एव अथवा गजेन एव गच्छामि। अरण्यं मह्यं न रोचते।' इत्थं सः कन्यां वरयितुं विविधप्रदेशान् अगच्छत्। पुनः एकदा विदर्भदेशस्य इन्दुमतीं नाम कन्यां सः अमिलत्। इन्दुमती रूपवती आसीत्। तथापि रूपसिंहः तस्याः लक्षणानि ज्ञात्वा ताम् अवदत्,' 'भद्रे! त्वं सुरूपा असि। किन्तु अहं ते एकं रहस्यं कथयामि। पित्रोः मया सह वैमनस्यं वर्तते। अतः अहं राज्यं त्यक्त्वा कुत्रचित् निवत्स्यामि। तत्र साहसेन श्रियं लब्ध्वा जीविष्यामि।'

इन्दुमती राज्ञी भवितुं मनसि ऐच्छत्। अतः सा राजकुमारं रूपसिंहं वरयितुं निषेधम् अकरोत्। इत्थं

रूपसिंहः अनेकाः कन्याः दृष्टवान् किन्तु तासु सः स्नेहस्य अभावम् अपि च गुणानाम् अभावम् अपश्यत्। अतः सः न कामपि कन्याम् अचिनोत्।

एकस्मिन् दिवसे सः स्वराज्यस्य ग्रामप्रदेशान् विलोकयितुं निरगच्छत्। ग्रामप्रदेशेषु मार्गे मार्गे ग्रामजनाः तस्य स्वागतम् अकुर्वन्। कृषीवलाः हैयङ्गवीनं फलैः सह दत्त्वा तस्य परिचर्याम् अकुर्वन्। रूपसिंहः सर्वेभ्यः कुशलवृत्तान्तम् अजानात्। सैनिकानां ग्रामणीनां ग्रामजनैः सह व्यवहारं ज्ञात्वा सः प्रसन्नः अभवत्। ग्रामप्रदेशेषु एकाकी एव भ्रमन् सः एकस्मिन् क्षेत्रे कृषीवलस्य क्षेत्रे रात्रिनिवासम् अकरोत्। रत्नपुरस्य ग्रामस्य निकटे क्षेत्रं वर्तते स्म। राजीवदासः क्षेत्रपतिः आसीत्। राजीवदासः तस्य पुत्र्या मधुरं भोजनम् अपाचयत्। राजीवदासस्य पुत्री रत्नवती कदलीपत्रे मिष्टं भोजनं पर्यवैष्यत्। रूपसिंहः तां दृष्ट्वा प्रसन्नः अभवत्। तस्या सामुद्रिकलक्षणानि सूचयन्ति स्म यत् सा राज्ञः महिषी भवितुं योग्या आसीत्। रूपसिंहः राजीवदासाय न्यवेदयत् यत्- 'अहं भवतः कन्यया उपांशुवार्तालापं कर्तुम् इच्छामि।' रूपसिंहः खट्वायाम् उपाविशत्। रत्नवती समीपे वृक्षस्य आलिन्दे उपाविशत्। रूपसिंहः अवदत्, 'मम पित्रा अहं राज्यात् निष्कासितः। अहम् अत्र वस्तुम् इच्छामि।' रत्नवती अवदत्, 'जीवने पित्रोः महान् उपकारः वर्तते। तयोः ऋणं दातुं न शक्यम्। भवान् पितुः सकाशं गत्वा पादयोः निपत्य क्षमां याचताम्। भवतः पिता अवश्यं क्षमां दास्यति।'

रूपसिंहः अवदत्, 'अस्माकं राज्यस्य बहवः रिपवः सन्ति। ते सर्वे आक्रमणं करिष्यन्ति इति मे मनसि भयम्।' रत्नवती अवदत्, अस्माकं राजा मनोहरसिंहः महान् प्रतापी राजा वर्तते। रिपूणाम् आक्रमणं कर्तुं साहसं नास्ति। भवान् अपि तस्य पुत्रः। अतः तस्य वीरता त्वयि अपि भवेत् एव। युवयोः समीपे रिपवः वामनाः एव। रूपसिंहः पुनः अपृच्छत्, 'किं त्वं पाककलां जानासि?' सा अवदत्, 'मम मात्रा शिक्षितं सर्वम् अपि। मया गुरुभ्यः विद्याज्ञानं प्राप्तं, मम पितुः सकाशात् अहं श्रमं कर्तुम् अजानाम्।'

रूपसिंहः सहसा अपृच्छत्, 'अस्माकं देशे कृषीवलाः कस्मात् दरिद्राः वर्तन्ते?' रत्नवती अवदत्, 'महानुभाव! अहं विचारयामि यत् कृषीवलाः केवलं वृष्टिजलस्य आश्रिताः भूत्वा कृषिं कुर्वन्ति। ग्रामेषु नदीजलानां संग्रहः आवश्यकः। मेघस्य जलं प्रभूतं वर्षति किन्तु प्रावृषि मेघस्य जलस्य सञ्चयः आवश्यकः। अस्माकं कृषीवलाः केवलं धान्यकणान् प्ररोहयन्ति। प्रतिवर्षं अन्यद् अपि शस्यजातं शाकानि च क्षेत्रेभ्यः प्राप्य तेषां विक्रयं कृत्वा धनं लब्धुं शक्यम्।'

इत्थं रूपसिंहः कन्यां परीक्ष्य अपरेद्युः तस्याः लावण्यं बुद्धिप्रभावं च ज्ञात्वा तां पर्यणयत्।

रत्नवती महिषी भूत्वा प्रजाः सम्यग्रूपेण पर्यपालयत्। सा अधिकारिणां दूषणानि ज्ञात्वा तान् सेवायाः दूरम् अकरोत्। सा कुशलान् राष्ट्रभक्तान् सेवकान् न्ययोजयत्। श्रमिकाणां दरिद्राणां च दुःखानि ज्ञात्वा तेषां समस्याः अपि दूरम् अकरोत्। रत्नवती स्वराज्ये श्रमस्य प्रतिष्ठां कृत्वा स्वराज्यं कर्मशीलम् अकरोत्। रूपसिंहः अपि सुखेन तया सह जीवनम् अत्यवाहयत्।

**8, राजतिलक बंगलो,**
**आबादनगरसमीपे, बोपल, अहमदाबाद-58**

# सरसो वै आदित्यग्रहः

❑ डॉ. रामनारायणः शास्त्री

**आदाय श्येनो अभरत्सोमं सहस्रसवाँ अयुतं च साकम्।**
**अत्रा पुरन्धिरजहादरातीर्मदे सोमस्य मूरा अमूरः॥**

"सरसो वै आदित्यग्रहः" इत्यत्र शीर्षकवाक्ये आदित्यशब्दः प्रमुखतां भजते। कथं स सरस इत्येव आस्माकीनो विचारणीयो बिन्दुः। रसेन सहितः सरसः। सरस इत्यत्र न केवलं रसेन सहितोऽपितु रसेन पूर्णः परिपूर्ण इति।"रसेन तृप्तो न कुतश्चनो नः"[1] इति वैदिकी श्रुतिवद् आदित्यग्रहोऽपि रसेन तृप्तः सरसः रसवानिति।

कथं स सरसः? इति विचारणात्पूर्वम् आदित्यः कस्मादादित्यः? कश्चासौ आदित्यः? इति विमर्शनीय-मावश्यकं वयं मन्यामहे। शाङ्खायनब्राह्मणमाश्रित्य प्रचलतीदं सदनम् अतः प्रथमन्तावद् ब्राह्मणग्रन्थानेव आश्रयामो विचारसरणिमग्रे सरणाय। तित्तिरिमुनेः प्रवचनं निर्वचनं वा वर्तते यद् देवेतरा येऽसुरास्तेषां प्रकाशं ग्रहं वा योऽगृह्णात् स्वीकृतवानिति तेनासौ आदित्यः। "यदसुराणां लोकानादत्त तस्मादादित्यो नाम।"[2] एवमेव जैमिनिमुनेः प्रवचनं यद् एतेषां भूतमात्राणां सर्वस्वं स अगृह्णात् तेन कारणेन तस्य आदित्यस्य आदित्यत्वं विद्यते। "तद्यदेतेषां भूतानामदत्त तदादित्यस्यादित्य-त्वम्"[3]। महर्षेर्याज्ञवल्क्यस्य निर्वचनं वर्तते यदसौ प्रादुर्भवन्नेव नक्षत्राणां शक्तिं क्षत्रं वा गृहीतवान् तेनैवास्य आदित्यो नामाभवत्। "तेषां (नक्षत्राणां) एष उद्यन्नेव वीर्यं क्षत्रमादत्त तस्मादादित्यो नाम[4]। मातृनाम्ना सुख्यातस्य महामुनेरैतरेयस्य महीदासस्य सुवचनमस्ति प्रजापतेः रेतसः प्रथमोद्दीपनादसौ आदित्यो जातः। "तस्य (प्रजापतेः) यद्रेतसः प्रथममुद्दीप्यत तदसावादित्योऽ-भवत्"[5]। महर्षी जैमिनियाज्ञवल्क्यौ मन्येते यत् संवत्सरस्य द्वादश मासा एव द्वादश आदित्याः सन्ति यतोहि ते द्वादश मासाः सर्वं स्वीकुर्वाणाः गृह्णाना वा यन्ति तस्मात्ते आदित्याः कथ्यन्ते। "कतम आदित्या इति? द्वादशमासाः संवत्सरस्यैत आदित्या एते हीदं सर्वमा-ददाना यन्ति ते यदिदं सर्वमाददाना यन्ति तस्मादादित्या इति"[6]। महर्षेर्यास्कस्य निरुक्तनाम्ना प्रसिद्धं निर्वचनशास्त्रं वयं सर्वे जानीम एव। तत्र शास्त्रे चतुर्भिः कारणैः आदित्य आदित्यो भवतीति निर्वक्ति निरुक्तकारः। प्रथमं कारणं यत् स रसमादत्ते तस्मादादित्यः। द्वितीयं कारणं यन्नक्षत्राणां दीप्तिं भासं स्वीकुरुते प्रददाति च तस्मात् स आदित्यो भवति, आ समन्ताद् दीप्तो भवति तस्मात् स आदित्य उच्यते। अथ च अदितेः पुत्रत्वाद् आदित्य इति चतुर्थं कारणम्। "आदित्यः कस्मात् आदत्ते रसान्। आदत्ते भासं ज्योतिषाम्। आदीप्तो भासेति वा। अदितेः पुत्र इति वा"[7]। अन्यत्र प्रकरणे आदित्यस्य आदित्यत्वे कारणत्रयं गणयति निरुक्तकारो यास्कः। दीप्तिं प्रकाशं वा आविर्भावयति, उदकं संवृणोति, गृहीतं जलं किरणैः पुनः परावर्तते। "आविष्कुरुते भासमादित्यः। गूहते बुसम्। बुसमित्युदक नाम ब्रवीतेः शब्दकर्मणः, भ्रंशतेर्वा। यद् वर्षन्पातयत्युदकं रश्मिभिस्तत् प्रत्यादत्ते"[8]। महर्षि जैमिनिः यज्ञायज्ञीयं स्तोममादित्यं वदति सहैव च कारणमपि निगदति यत् स कस्मैचन प्राणिने भूताय वा दुःखं न प्रापयति। "अथ यज्ञायज्ञीयम्। स ह स नाक एव स्तोमः। आदित्य एव सः। एष हि न कस्मैचनाक-मुदयति"[9]। सूर्यः सर्वेभ्यः सहस्रगुणं प्रत्यादानाय पूर्वं रसमादत्ते। एतावतैव स आदित्य इति कथयति कविकुलगुरुः कालिदासः। "सहस्रगुणमुत्स्रष्टुं हि रसमादत्ते रविः"[10]।

सारसर्वस्वं हि रसः। रसो हि सारसर्वस्वं शक्तिर्बलं

वा वर्तते। रसहीनः साररहितो भवति। रसवानेव सारवान् भवति शक्तिसम्पन्नश्च। सर्वेभ्यो रसादानप्रदानात् सर्वेभ्यश्च दीप्तिप्रदानात् सहस्रगुणञ्चामृतं वारिवितरणात् कस्मैचन भूतमात्राय दुःखं नोत्पादनाद् इत्येतेभ्यः कारणेभ्य आदित्य आदित्यः सरसश्च विद्यते।

चराचरेऽस्मिन् ब्रह्माण्डे यत्किमपि तत्त्वं वरीवर्ति तत्सर्वं गण्यते। आदित्यग्रहोऽधिदेवे वर्तत इति वयं विद्मः।'यथा ब्रह्माण्डे तथा पिण्डे' इति सिद्धान्तमाश्रित्य यदा वयं मीमांसामहे तदा ब्रह्माण्डे यदधिदेवं तदेव पिण्डे अध्यात्मं कथ्यते। आदित्यो यदा ब्रह्माण्डे सूर्यः सविता तदा असौ पिण्डे चक्षुः प्राणो हृदयं वा निगद्यते। एतावतैव कश्चासौ आदित्य? इति विचारचर्चायां ब्राह्मणाना-मुद्धरणान्यत्र प्रस्तुमः। असावादित्यो देवः सविता[11]। असौ वा आदित्यः सूर्यः[12]। अथ यत्तच्चक्षुरासीत् स आदित्योऽभवत्[13]। चक्षुरादित्यः[14]। असौ वा आदित्यो हृदयम्[15]। उद्यन्नु खलु वा आदित्यः सर्वाणि भूतानि प्रणयति तस्मादेनं प्राण इत्याचक्षते[16]। असौ वा आदित्यः प्राणः[17]। पर्जन्य आदित्यः[18]। असौ वा आदित्य इन्द्रः[19]। अत्र एषूद्धरेणेषु सविता सूर्यः प्राणश्चक्षुः पर्जन्यो हृदयञ्चैतत् सर्वम् आदित्यत्वेन कथ्यते। अत्राधिदेवे सविता सूर्यः पर्जन्यः, अध्यात्मे च चक्षुः प्राणो हृदयं वा भवेद् एतत्सर्वं सरस एव।

आदित्य एव सर्वं जगत् शास्ति। एतावतैव स सर्वेषां भूतानां स्वामी अधिपतिर्वा वर्तते। शासकः शासकत्वात् कठोरो भवति नम्रश्च। विवाहसंस्कारे संस्कारविधौ नववध्वै आशीर्वचांसि सन्ति- ''साम्राज्ञी श्वशुरे भव साम्राज्ञी श्वश्र्वां भव साम्राज्ञी ननान्दरि साम्राज्ञी अधिदेवृषु''। अत्र प्रेम्णा नम्रत्वेन सेवाभावेन वा साम्राज्याय आशिषः सन्ति। प्रेम सेवा नम्रता च सरसत्वेनैव भवन्ति। एवमेव रघुवंशे महाकाव्ये राज्ञो दिलीपस्य चरित्रचित्रणे महाकविः कालिदासः प्रत्यपादयत् स गुणैरेव प्रजाभ्यः प्राप्योऽप्राप्यश्चासीत्। ''भीमकान्तैर्नृप-गुणैः स बभूवोपजीविनाम्। धृष्यश्चाभि-गम्यश्च यादो रत्नैरिवार्णवः।।'' अतएव आदित्यः सरसत्वात् स्वामी शासकश्च वर्तते। अतो ब्राह्मणग्रन्थेषु वर्तते आदित्यः सर्वं जगत् शास्ति, सर्वेषां भूतानां स्वामी च विद्यते। आदित्यो ह्यस्य सर्वस्येष्टे[20]। आदित्य एषां भूतानामधिपतिः[21]। सत्यं सर्वत्र सर्वदा च सारवत् सरसश्च भवति। यशश्चापि सरसत्वेन भवति नान्यथा। अतएव आदित्यः सत्यं यशश्चापि निगद्यते ब्राह्मणग्रन्थैः। असावादित्यः सत्यम्[22]। तद्यत् सत्यमसौ स आदित्यः[23]। आदित्य एव यशः[24]।

ब्राह्मणग्रन्थेषु आदित्यः साक्षाद् ब्रह्म कथ्यते। असौ वा आदित्यो ब्रह्म[25]। असावादित्यो ब्रह्म[26]। असावादित्यः सुब्रह्म[27]। केवलं ब्रह्म एव नोऽपितु ''ओम्'' इत्यपि कथ्यते ब्राह्मणग्रन्थैः आदित्यः। ओमित्यसौ योऽसौ (आदित्यः) तपति[28]। एभिः नामभिरादित्यः सरसः। यं वयं स्वर्गलोकं वदामः स तु ओमित्यादयः[29]। सरस एव, यतोहि यदि तत्र रसः सारो वा न भवेत् तर्हि कथं स स्वर्गः? रसेन सारवत्त्वेनैव च सुखं भवति, सुखविशेषश्च स्वर्गः। यथा च महर्षिर्दयानन्दः सरस्वती निजगाद- यत्र सुखं सुखविशेषस्य च साधनानि भवन्ति स स्वर्गः[30]। एतावतैव आदित्यं स्वर्गलोकं निगदति वैदिकवाङ्मयः- असौ वा आदित्यः स्वर्गलोकः[31]। असौ खलु वा आदित्यः सुवर्गो लोकः[32]। यज्ञेन देवा मानवा वा स्वर्गलोकमिच्छन्ति प्राप्नुवन्ति च[33]। आदित्यो यज्ञः[34]। स्वर्गो लोको यज्ञः[35]। एतत्सर्वम् आदित्यस्य सरसतां प्रतिपादयति।

यज्ञसमयः सवनमित्युच्यते, तच्चैकस्मिन् दिवसे सवनत्रयं भवति प्रातः सवनं माध्यन्दिनं सवनं तृतीयसवनं सायं सवनं वेति। यथा यज्ञसमयः त्रिधा विभक्तस्तथैव देवा अपि त्रय एव वसवो रुद्रा आदित्या इति। ''अथेमं

विष्णुं यज्ञं त्रेधा व्यभजन्त वसवः प्रातः सवनं रुद्रा माध्यन्दिनं सवनमादित्यास्तृतीयसवनम्। अग्निः प्रातः सवनमिन्द्रो माध्यन्दिनं सवनं विश्वेदेवास्तृतीयसवनम्। गायत्री प्रातः सवनं त्रिष्टुभ्माध्यन्दिनं सवनं जगती तृतीयसवनन्तेनापशीर्ष्णा यज्ञेन देवा अर्चन्तः श्राम्यन्तश्चेरुः''[36]। वसूनां यज्ञसमयः पृथग् अमिश्रस्तत्र नापरः कश्चन आयाति, एवमेव रुद्राणामपि यज्ञसमयः पृथगेव वर्तते परमादित्यानां सवनं मिश्रं विद्यते। यत् तृतीयसवनं मिश्रं तदेव आदित्यानां सवनम्। मिश्रं सवनं आदित्यग्रहं सरसं करोति। ''त्रयो वै देवाः। वसवो रुद्रा-आदित्याः, तेषां विभक्तानि सवनानि। वसूनामेव प्रातः सवनं रुद्राणां माध्यन्दिनं सवनमादित्यानां तृतीयसवनम्। तद् वा अमिश्रमेव वसूनां प्रातःसवनममिश्रं रुद्राणां माध्यन्दिनसवनं मिश्रमादित्यानां तृतीयसवनम्। ते ह आदित्या ऊचुः। यथेदममिश्रं वसूनां प्रातःसवनममिश्रं रुद्राणां माध्यन्दिनं सवनमेवं न इमं पुरा मिश्राद्ग्रहं जुहुथेति तथेति देवा अब्रुवंस्ते संस्थित एव माध्यन्दिने सवने पुरा तृतीयसवनात्''[37]।

आदित्यग्रहेण यदा तृतीयसवनं स्वीक्रियते तदा स्वीयेन देवेन तृतीयसवनं स्वीक्रियते। तृतीयसवनम् अधिगृहीतरसं सवनं विद्यते। एतेन सरस आदित्यग्रहः। ''वसूनां वै प्रातःसवनं रुद्राणाम्माध्यन्दिनं सवनमादित्यानां तृतीयसवनं तद् यदादित्यग्रहेण तृतीयसवनं प्रतिपद्यते स्वीययैव तद् देवतया प्रतिपद्यते, अथोऽधीतरसं वा एतत्सवनं यत् तृतीयसवनमथैष सरसो ग्रहो यद् आदित्यग्रहः''[38]।इत्थं सरसो वै आदित्यग्रहः।।

**।। सन्दर्भाः ।।**

A ऋग्वेदः 4.26.7

1. अथर्ववेद 10,8,44 2. तैत्तिरीयब्राह्मणम् 3,9,21,2

3. जैमिनीयब्राह्मणम् 2,26 4.मा. शतपथब्राह्मणम् 2,1,2,18

5. ऐतरेयब्राह्मणम् 3,34 6. मा. शतपथब्राह्मणम् 11,6,3,18 तथा तु. जैमिनीयब्राह्मणम् 2,77

7. निरुक्तम् 2, 4, 2 8. निरुक्तम् 4, 3,7

9. जैमिनीयब्राह्मणम् 1,3,13 10. रघुवंशम् 1, 21

11. मा. शतपथब्राह्मणम् 6,3,1,18-19

12. मा. शतपथब्राह्मणम् 4,9,2,23

13. जैमिनीयोपनिषद्ब्राह्मणम् 3,1,2,7/3,2,2,3

14. मा. शतपथब्राह्मणम् 3,2,2,13

15. मा. शतपथब्राह्मणम् 9,1,2,40

16. ऐतरेयब्राह्मणम् 5,31 17 तैत्तिरीयसंहिता 5,2,5,4

18. गोपथब्राह्मणम् 1,4,3 19 तैत्तिरीयसंहिता 1,7,6,3

20.मा. शतपथब्राह्मणम् 6,1,3,17 21.ऐतरेयब्राह्मणम् 7,20

22. तैत्तिरीयब्राह्मणम् 2,1,11,2

23 मा.श.ब्रा. 6,7,1,2/14,8,623

24. गोपथब्राह्मणम् 1,5,15/तु.मा.श.ब्रा.12,3,4,8

25. मा.श.ब्रा. 6,4,4,14/14,1,3,3

26. शांखायनब्राह्मणम् 1,5 27. षड्विंशब्राह्मणम् 1,1

28. ऐतरेयब्राह्मणम् 5,32

29. जैमिनीयोपनिषद्ब्रा. 3,3,3,12

30. आर्योद्देश्यरत्नमाला अथ स्वमन्तव्यामन्तव्यप्रकाशः।

31. मा.श.ब्रा. 8,7,1,5 32 तैत्तिरीयारण्यकम् 5,9,11

33. ऐतरेयब्राह्मणम् 1,16 34. मा.श.ब्रा. 14,1,1,16

35. शांखायनब्राह्मणम् 14,1

36. मा.श.ब्रा. 14,1,1,15-16,17

37. मा.श.ब्रा. 4,3,5, 1-2

38. शांखायनब्राह्मणम् 16,1 तथा 30,1

**सह आचार्यः, संस्कृतविभागः**
**राजकीयस्नातकोत्तरमहाविद्यालयः**
**सिरोही-307001 ( राजस्थानम् )**

संस्कृत समाचारः

# जयपुरस्थ संस्कृत विद्यालये 'व्याकरण सूत्र-अन्त्याक्षरी' प्रतियागिताया आयोजनम्




(संस्कृत वृत्तान्तः, वार्ताहरः दीपकः शास्त्री) राजगंगा चेरिटेबल-ट्रस्ट एवं राजकीय-महाराज-वरिष्ठोपाध्याय-संस्कृत-विद्यालयः जयपुरम् इत्यनयोः संयुक्ततत्वावधाने व्याकरण सूत्र-अन्त्याक्षरी प्रतियोगिता नवम्बरमासस्य सप्त दिनांके समायोजिता। अस्यां प्रतियोगितायां जयपुरमण्डलस्य छात्राः आगतवन्तः।

मुख्यनिर्णायकत्वेन प्रो. श्री मोहनलालशर्ममहोदयाः श्री ईश्वरप्रसादशर्ममहोदयाः तथा श्री राजारामशर्म-महोदयाः आसन्। कार्यक्रमे मञ्चासीनः मुख्यातिथिरूपेण श्री नाथूलाल सुमनमहोदयाः, सारस्वतातिथिरूपेण न्यासस्य संरक्षिका प्रो. राजेश्वरीभट्टमहोदया, विशिष्टातिथिरूपेण प्रो. श्रीकृष्णशर्ममहोदयाः द्वितीय-विशिष्टातिथिरूपेण दिव्य-ज्योति-ट्रस्ट द्वारा संचालित मन्दिरस्य महांतः श्री लक्ष्मणदास शर्ममहोदयाः, संस्थाप्राचार्यः डॉ. गजानन्दशर्ममहोदयाः च आसन्। कार्यक्रमे समागतानाम् अतिथीनां संस्थाप्राचार्यः डॉ. गजानन्दशर्ममहोदयः तथा विद्यालयस्य अध्यापकाः स्वागतं कृतवन्तः।

प्रतियोगितायां जयपुरस्य त्रयोदशविद्यालयस्य छात्राः समागताः। प्रतियोगितायां प्रथमं पुरस्कारं 3100 रूप्यात्मकम् राज. महा. वरि. उपा. सं. विद्यालयः जयपुरम् इत्यस्य बालिके (1) यशस्वी पारीक (2) संजू पांचाल प्राप्तवत्यौ। द्वितीयं पुरस्कारं 2100 रूप्यात्मकम् राज. प्रवे. सं. विद्यालयः विमलपुरा फागी इत्यस्य बालिके (1) पूजा सैन (2) सुमन सैन प्राप्तवत्यौ।

तृतीयं पुरस्कारं 1100 रूप्यात्मकम् राज. वरि. उपा. सं. विद्यालयः कालच्या इत्यस्य छात्रौ (1) कमल कुमार सेपट (2) प्रकाश सैनी प्राप्तवन्तौ। श्रीकृष्णशर्ममहोदयः उक्तवान् यत् आगामिनि वर्षे सम्पूर्ण अष्टाध्यायीशास्त्रं कंठस्थीकृर्वन्तु।

# वास्तुशास्त्रस्य परिचयः

❑ मुकेशकुमारः पारीकः

अस्य जगतः सर्वे प्राणिनः एतादृशं स्थानम् इच्छन्ति यत्र ते स्व सम्पूर्ण-जीवनं सुखेन सुरक्षितरूपेण च जीवितुं समर्थाः भवेयुः। निवास एतादृशो भवेत् यत्र कस्यापि प्रकारस्य भयं न भवेत्। प्रत्येकं वातावरणे कस्यामपि परिस्थितौ तं तस्य परिवारं च किमपि कष्टं न भवेत्। अतः प्रत्येकं जनस्य कृते स्वपरिवारस्य च कृते उचित-निवास-स्थानस्य अथवा भवन-निर्माणस्य क्षमता प्रकृत्या जैविक-प्रवृत्तिरूपेण प्रदत्ता। प्रत्येकं प्राणी कामं सूक्ष्मं स्थूलं वा स्वावश्यकतानुसारं योग्यतानुसारं च निवासाय गृहं निर्माति।

प्रत्येकं जीवे स्वयोग्या गृहनिर्माणप्रवृत्तिः योग्यता च एकवंशतः अन्यवंशं वंशानुगतरूपेण प्राप्ता भवति। कस्यापि प्राणि-विशेषस्य गृह-निर्माणस्य विधिः प्रायेण न परिवर्तितः। अद्यापि दृश्यते यत् पक्षिणः तादृशम् एव नीडं निर्मान्ति यादृशः पूर्वसमये निर्मीयते स्म। इदं प्राकृतिकमेवाश्चर्यं यत् प्राणी स्वनिवासं एवं निर्माति येन सः स्वस्य स्वपरिवारस्य च स्वारिभ्यः प्राकृति-कापद्भ्यः सुरक्षां कर्तुं शक्नुयात्। अपि च प्रकाश-वर्षा-वायु-तापादीनां प्राकृतिक-स्रोतसामावश्यकतानुसार-मुपयोगं कर्तुं प्रभवो भवेत्।

प्राणिषु सर्वोत्तम-प्राणी मनुष्यः। तस्य विकसित-मष्तिष्कः ईश्वर-प्रदत्तोऽस्ति। अनेन सः स्वविवेकेन विचार्य कार्यं करोति। निवासाय भवनस्य आवश्यकता भवति। निवासाय सुरक्षादृष्ट्या च भवनस्य निर्माणं भवेत्। सार्वजनिकोपयोगाय सामान्य-जनानाञ्च कल्याणाय कूप-वापी-मन्दिरादीनां निर्माणेन पुण्यस्य प्राप्तिर्भवति।

प्राचीन-भवनस्य, देवालयस्य, कूपस्य, वाप्यादीनां जीर्णोद्धारेण जनं सामान्यात् अष्टगुणाधिकं पुण्यं मिलतीति शास्त्रोक्तमस्ति। अन्यजनस्य भूमौ भवने वा शुल्कं विना यज्ञस्य, अनुष्ठानस्य, शुभकर्मकरणस्य च निषेधः वर्तते। यतो हि एतेषां सर्वेषां कर्मणां शुभफलं भवन-स्वामी प्राप्नोति। अयं ब्रह्माण्डः पञ्चाधारभूत-पदार्थेभ्यः निर्मितः। एते पदार्थाः पञ्चमहाभूतानि कथ्यन्ते। एतेषां पदार्थानां प्रभावान् अवगम्य तदनुसारं स्वभवनस्य आकार-प्रकारादिकं निर्माय मनुष्यः स्वजीवनं कार्यक्षेत्रञ्च अधिकाधिकं सुखिनं, सुविधा-सम्पन्नं च कर्तुं शक्नोति।

दिगनुसारं भवन-निर्माणं कृत्वा तस्मिन् यः निवसति तस्मिन् जने ''वास्तु'' इत्यस्य स्पष्टरूपेण प्रभावः पतति। प्राचीनकालादेव अस्माकं ऋषयः प्रभावाणामेषां अध्ययनं कृतवन्तः स्वानुभवान् च अस्माकं कृते अग्रे सारितवन्तः। शास्त्रेषु च लिखितवन्तः। इदमेव ज्ञानं 'वास्तुशास्त्रमिति' उच्यते।

वास्तुरीत्या भवने निवासकरणेन स्वास्थ्यस्य सम्पदश्च वृद्धिः, ज्ञानप्राप्तिः, सन्तानसुखस्य च प्राप्तिर्भवति। जीवने शान्तिर्भवति, व्यक्तिः सर्व-ऋणेभ्यः मुक्तो भवति। शास्त्राणां सम्मतेः उपेक्षया अपयशसः, अनावश्यक-यात्राणां स्थितिः अनेकदुःखानाञ्चोपस्थितिः भविष्यति। सर्वेषां भवनानां निर्माणं वास्तुशास्त्रानुगुणं

भवेत् नगराणाञ्च योजना तदनुसारमेव भवेत्। अतएव समस्त-लोकस्य कल्याणाय तथा च सुख-समृद्धेः कामनायै वास्तुशास्त्रं प्रस्तुतमस्ति।

वास्तुशास्त्रमेकं प्राचीन-विज्ञानम् सांस्कृतिक-धरोहररूपेण महत्त्वपूर्णमस्ति। शास्त्रेऽस्मिन् निवासस्य कार्याणाञ्च कृते भवननिर्माणसम्बन्धिसिद्धान्तानां विधीनाञ्चोल्लेखः वर्तते। वास्तु केवलं भवन-निर्माणकलायाः एव नाम नास्ति अपितु अत्र एतादृशाः सिद्धान्ताः निर्देशाश्च निहिताः सन्ति यैः ज्ञायते यत् भवनस्य निर्माणाय भूमेः चयनं कस्मिन् स्थाने, कस्मिन् आकारे, कस्यां च दिशि कर्त्तव्यम्, मृत्तिका-परीक्षणं कथं कर्त्तव्यम्। शिलान्यासः कथं कर्त्तव्यः, भवन-निर्माणं कथं कर्त्तव्यम् इत्यादयः। वास्तुशास्त्रं वैज्ञानिक-रूपेण अस्मान् शिक्षयति यद् अस्माभिः भवनस्य नियोजनं, निर्माणञ्च एवं कर्त्तव्यम् येन अस्माकं जीवनं सुख-समृद्धियुक्तं भवेत् तथा च व्यवसाये निर्बाधगत्या लाभं प्राप्य वयम् उन्नतिं प्राप्नुयाम।

वास्तुशास्त्रस्योद्गमः स्थापत्यवेदात् अभवत्। अयम् अथर्ववेदस्यैव एकः अंशः वर्तते। अस्मिन् विषये अन्यानि प्राचीन-शास्त्राण्यपि सन्ति-विश्वकर्माप्रकाशः, समरांगणसूत्रधारः, कश्यपशिल्पशास्त्रम्, बृहत्संहिता, प्रमाणमञ्जरी, इत्यादयः।

शोधार्थी
राष्ट्रियसंस्कृतसंस्थान्, जयपुरम्

# संस्कृतभाषा राष्ट्रसंरक्षिका

❑ सुरेन्द्रसिंह बैरवा

**ज्ञाननिर्देशिका विज्ञानपोषिका,**
**वेदविस्तारिका वैभववर्धिका।**
**पुण्या पवित्रा विद्यासम्पादिका,**
**संस्कृतभाषा राष्ट्रसंरक्षिका।।1।।**

**संस्कृतिरक्षिका संस्कारवाहिका,**
**संसारचालिका संदेशदायिका।**
**पुण्या पवित्रा योगे संयोजिका,**
**संस्कृतभाषा राष्ट्रसंरक्षिका।।2।।**

**संवादशोधिका शिक्षणशिक्षिका,**
**विस्मृतस्मारिका भाषासु काशिका।**
**पुण्या पवित्रा शक्तिसंवाहिका**
**संस्कृतभाषा राष्ट्रसंरक्षिका।।3।।**

**प्रीतिप्रवाहिका प्रसादप्रेरिका,**
**प्रबोधबोधिका गूढप्रकाशिका।**
**पुण्या पवित्रा संघे संघटिका,**
**संस्कृतभाषा राष्ट्रसंरक्षिका।।4।।**

**नीतिनिवेदिका यज्ञेषु वेदिका,**
**पथप्रदर्शिका पथिषु पथिका।**
**पुण्या पवित्रा ज्ञाने सम्मोहिका,**
**संस्कृतभाषा राष्ट्रसंरक्षिका।।5।।**

**प्र. स्ना शिक्षक संस्कृतम्**
**के. वि. क्र. 1 जयपुरम्**

# योगस्योपादेयता

❑ लता राठौड़ः

''**शरीरमाद्यं खलु धर्मसाधनम्**'' स्वस्थशरीरे एव स्वस्थमस्तिष्कः निवसति इति विचारान् आधारीकृत्य विषयमिदमायाति यत् यावत् मानसं मस्तिष्कश्च शान्तौ स्थिरौ च न भवतः तावत् सुखस्यावाप्तिः दुर्लभा। प्राचीनयुगे तु चत्वारः पुरुषार्थाः सुखप्राप्तये परिकल्पिताः। उपर्युक्तसुभाषितेन सिद्ध्यति यत् योगेन विना धर्मसाधनं तथा च ध्यानं विना मोक्षः कथमपि नैव भवितुमर्हति। एवमेव कामस्य कृतेऽपि स्वस्थशरीराय योगः उपकुरुते। तथा च अर्थसिद्धिः अपि भवति एव योगानुशासनेन शिक्षणेन च।

अत्याधुनिके युगे विज्ञानस्य प्रभावेण सर्वाणि दुष्कराणि कार्याण्यपि अतीव सरलानि जातानि। किं दुष्करं विज्ञानाय? किं वा असाध्यम्? मानवः विज्ञानस्य प्रभावेण खे खगवत् उत्पतने जले मीनवत् तरणे चन्द्ररोहणेऽपि सक्षमोऽभवत्। संगणकयन्त्रं चलदूर-भाषयन्त्रादयः अनेके आविष्कारा मनुजस्य सुख-सम्पादनाय वैज्ञानिकैः कृताः। परं सुखं न लब्धम् इति महदाश्चर्यं प्रतिभाति मे। किं कारणमस्ति एतस्य इति विचारयन्तः वयमेवं चिन्तयामः यत् भौतिक साधनैः सुखं न प्राप्तुमर्हन्ति मनुष्याः। यतो हि सुखं त्रिविधं शारीरिकं मानसिकमात्मिकञ्चेति। तत्र तृतीयं तु योगिनामपि दुर्लभम्। प्रथमं भौतिकसाधनैः भवितुं शक्नोति। परं द्वितीयं विना प्रथममपि लब्धुं नैव शक्नुवन्ति नराः। द्वितीयं मानसिकं सुखं चित्तस्य शान्तिः वर्तते। परं चित्तस्य कृते शान्तिः अस्मिन् युगे नैव दृश्यते यतः यत्र ध्वनिजलवायुप्रदूषणानि, कार्यस्यातीवभारः, शारीरिकरोगाः, आलस्यमनेकाः चिन्ताः सन्ति तत्र शान्तिः अस्मिन् युगे नैव दृश्यते। वैदेशिकानां समीपे सर्वाणि भौतिकसाधनानि सुलभानि प्रभूतं धनमपि अस्ति परं सुखशान्तिः नास्ति। तेऽपि भारते प्रतिपादितं योगमाश्रित्य सुखं लभन्ते। योगेन न केवलं चित्तशुद्धिः भवति अपितु शरीरशुद्धिः आत्मशुद्धिः अपि भवति। एवं त्रिविधदुःखनाशकात् योगात् ऋते न काऽपि गतिः।

**योग** :- 'योग' शब्दः युज् धातुना घञ् प्रत्यये योजिते सति सिद्ध्यति अस्यार्थः समाधिः योजनं संयमनं वा भवति। यद्यपि गूढोऽयं विषयः तथापि मयोपक्रम्यते यतो हि-

**अल्पश्रुतं श्रुतवतां परिहासधाम**
**त्वद्भक्तिरेव मुखरीकुरुते बलान्माम्।**
**यत्कोकिला किल मधौ मधुरं विरौति**
**तच्चाम्रचारुकलिका निकरैकहेतुः।।**

पतञ्जलिमहाभागेन उक्तम्-

''**योगश्चित्तवृत्तिनिरोधः।।**''

परमयोगिना पूर्णकलावतारश्रीकृष्णेन गीतायां निगदितम् -

**।। योगः कर्मसु कौशलम्।।**

**योगी याज्ञवल्क्यः परिभाषते-**

**।। संयोगो योग इत्युक्तः जीवात्मपरमात्मनोः।।**

एवञ्च योगसूत्रे कथितं वर्तते-

योगः समाधिः। स च सार्वभौमः चित्तस्य धर्मः। तात्पर्यमिदं वर्तते यत्-

1. योगः चित्तवृत्तीनां दमनं नास्ति अपितु निरोधः वर्तते।
2. योगः कर्मसु कुशलता अस्ति।
3. योगः ज्ञानस्वरूपं वर्तते।
4. योगः जीवात्मनः परमात्मना सह मेलनं योजनञ्च वर्तते।
5. योगः समाधिः ध्यानम् आत्मलीनता च वर्तते।

आधुनिकसन्दर्भे योगस्य का प्रासंगिकतोपादेयता चेति विचारयामः केषांचन जनानां धारणास्ति यत् योगस्तु

संसारतः विरक्तपुरुषाणां साधुसंन्यासिनां कृते चास्ति। सामान्यजनानां कृते तु एतत् नास्ति। एषा धारणा अनुचितास्ति। यतः योगः न केवलं योगिभ्यः अपितु सांसारिकजनेभ्यः अपि उपयोगी उपादेयश्चास्ति। योगाय आयुषो बन्धनमपि नास्ति। आबालवृद्धानां सर्वेषां जनानां कृते योगः हितकारी वर्तते। सर्वे जनाः योगस्य स्वकीयजीवने प्रयोगं विधाय लाभं प्राप्तुमर्हन्ति। योगस्य बहूवनिः प्रकाराणिः सन्ति यद् यस्य हिताय वर्तते सः तद् अंगीकृत्य लाभं लभेत। नार्यः अपि योगाभ्यासं कर्तुं प्रभवन्ति।

अस्मिन् सन्दर्भे एतत् अपि ज्ञातव्यम् अस्ति यत् योगः योगासनमेव नास्ति अपितु योगासनानि तु योगस्यैकम् अंगम्। योगस्य अन्यानि अपि महत्वपूर्णानि अंगानि सन्ति यानि अस्माकं कृते लाभकारीणि वर्तन्ते परं अष्टांगयोगनाम्ना योगः बहुप्रचलितोऽस्ति। एवं वयं कथयितुं पारयामः यत् योगस्तु बहूपयोगी विद्यते। अतः योगस्य उपादेयता विषये तु संशयः एव नास्ति। सामान्यजनेभ्यः अपि योगेन एते लाभाः तु जायन्ते-

1. योगेन शरीरं स्वस्थं रोगरहितं च भवति।

2. इन्द्रियाणां दमनं भवति। विजयं प्राप्नोति।

3. चेतनाचेतनेषु अन्तर्निहिता मानसिकविकाराः कुसंस्काराः दुर्वासनाः नाशमुपयान्ति।

4. सांसारिकव्यवहारेऽपि शुद्धिः जायते।

5. चञ्चलमानसं शनैः-शनैः एकाग्रताम् आप्नोति।

6. मेधसः बुद्धेश्च विकासो भवति।

7. संसारं प्रति तृष्णा समाप्तीभूय शान्तिं लभते जनः।

8. योगाभ्यासेन जीवनमतिसन्तुलिततामुपयाति।

9. योगाभ्यासेन आत्मसाक्षात्कारः परमात्मसाक्षात्कारः च भवति।

10. मनसि एकाग्रतायाः शक्तिः जागरिता जायते येन मानसं कुत्रापि स्थिरं कर्तुं प्रभवामः।

11. शीतोष्ण-क्षुधातृषादीनां बाह्यद्वन्दानां सहिष्णुता सहजक्षमता समायाति।

12. आन्तरिकद्वन्द्वानामुपरि विजयं प्राप्नोति चिन्ता-शोक-क्रोध-ईर्ष्यादयः भावा योगाभ्यासेन विनश्यन्ति।

13. प्राणिमात्रं प्रति शत्रुताभावना दूरीभूय मैत्रीभावना प्रादुर्भूता भवति।

**शिक्षकाणां कृते योगस्योपादेयता**-

शिक्षकः गुरुर्वा शिष्यस्य भाग्यविधाता वर्तते। न केवलं शिष्यस्य अपितु प्रकारान्तरेण सः देशस्य भाग्यनिर्माता विद्यते। शिक्षकस्योपरि बहुभारः वर्तते। गुरुं विना कथमपि शिक्षणं न भवितुं शक्यते अतः गुरूणां कृते कथमुपयोगी योगः इति विचार्यते:-

- बालकानां शारीरिकस्वास्थ्यवर्धनाय योगस्योपा-देयता वर्तते।
- बालकानां अवधानाय शिक्षको योगं विजानीयात्। ध्यानस्य केन्द्रीकरणाय अत्यन्तोपयोगी विद्यते योगः।
- अध्यापनं सरलं कार्यं नास्ति, अस्मै चित्तस्यै-काग्रतायाः महती आवश्यकता भवति, अतः शिक्षकाय योगः अतीव महत्त्वपूर्णः वर्तते।
- बालकेषु पलायनवादितायाः निरसनाय नैराश्यस्यः निराकरणाय अध्यापकेन योगो विज्ञातव्यः।
- चित्तस्य परिष्काराय समस्यानां समाधानाय च अस्य बहु महत्वं वर्तते शिक्षकाय।
- अन्तरात्मावलोकनाय शिक्षकाय योग उपादेयः।
- बालकेषु कुसंस्काराणां दुर्वासनानां नाशाय शिक्षकः योगस्य ज्ञाता भवेत्।
- बालकेषु मेधाबुद्धिप्रभृतीनां विकासाय गुरवे योगस्योपादेयत्वं वर्तते।
- स्मृतिधारणादीनां वृद्ध्यर्थं शिक्षको योगं जानीयात्।
- बालकेषु उत्तमसंस्कराणां स्थापनाय योगस्य ज्ञानमपेक्षितं शिक्षकाय।

- बालकानां मानसिकसन्तापविनाशाय शिक्षकेण योगो ज्ञेयः।

- सार्वभौमिक-सार्वकालिक-मूल्यानां बालकेषु विकासाय योगस्य महती उपयोगिता, तानि सन्ति-

।।अहिंसा-सत्य-अस्तेय-ब्रह्मचर्य-अपरिग्रहाः।।

**शिक्षार्थिनां कृते योगस्योपादेयता -**

शिक्षायाः केन्द्रीभूतः विद्यार्थी। यस्य कृते एव सर्वः प्रक्रमः। यदि शिक्षार्थी नास्ति चेत् शिक्षकस्य विद्यालयस्य अन्योपकरणानां का आवश्यकता। शिक्षार्थिनः ज्ञानग्रहणमेव लक्ष्यं भवति। बालकः शिक्षा किमर्थं गृह्णाति। समाजे समादरेण निवसनाय, स्वावलम्बनेन जीवनाय, कौशलानां वर्धनाय, प्रतिभायाः प्रवर्धनाय, रचनात्मकता याः विकासाय वा। एतानि एव मुख्योद्देश्यानि भवन्ति।

- बालकानां मानसिकविकासस्य योगस्योपादेयता। स्मृतिधारणादीनां वर्धनाय योगः सर्वोत्तमोऽस्ति। मानसिकसन्तापानां दूरीकरणायात्यन्तोपयोगी विद्यतेऽयम्।

- बालकानां शारीरिकविकासाय योगस्योपादेयता वरीवर्तते। योगेन योगांगानामनुष्ठानेन च शारीरिक-स्वास्थ्यं सुष्ठु भवति।

- बालकस्याध्यात्मिकविकासाय एषः उत्तमम् औषधम् अस्ति।उक्तं च -

**अयं तु परमो धर्मो यद् योगेनात्मदर्शनम्।**
**यस्तन्न वेद किमृचा करिष्यति।।**

- अतः बालकेषु आत्मावलोकनाय स्वावलम्बनस्य च विकासाय योगः प्रमुखं कारणम्।

- नवजातबालकेषु संवेगानामुपरि नियंत्रणं न भवति परं सः शनैः शनैः तेषाम् उपरि नियंत्रणं करोति परं केषुचित् विद्यार्थिषु केचन संवेगा अनियन्त्रिता भूत्वैव तिष्ठन्ति अतः तेषां नियंत्रणायोपशमनाय च योगः एकमुपकरणं भवितुमर्हति। योगेन क्रोधद्वहेर्ष्या-सूयानामुपरि नियंत्रणे सक्षमो भवति नरः। अतः योगः एतेभ्यः उत्तमौषधं वर्तते।

- बालकेषु नैतिकविकासस्याधारशिलैव योगः विद्यते।

- योगेन बालकानां चित्तानि एकाग्रीभवन्ति। अतः योगः ग्राह्यः आसनप्राणायामादिभिः, तेन सरलतया एकाग्रं भवति।

-योगेन मानसिकशारीरिकरोगाः विनश्यन्ति जनः स्वस्थः भवति। वातपित्तकफादयः समाः तिष्ठन्ति। अतः शरीरं स्वस्थं सन्तिष्ठते योगेन। योगेन मानसिक-सन्तापाः सर्वे विकाराश्च नाशमुपयान्ति।

- स्वाध्यायं प्रति प्रेरयति योगः कथितमेवास्ति-

**''समाधिप्रापणाय ज्ञानाय वा।''**

**''स्वाध्याययोगसम्पत्त्या परमात्मा प्रकाशते''**

भावोऽयं स्वाध्यायेन योगेन च समाधिः ज्ञानञ्च प्राप्यते जनैः। एवमेव सदाचारी भवति जनः यमनियमादीनामाचरणेन।

- बालकानां येषां यस्मिन् कर्मणि रुचिः वर्तते ते तेषु कार्येषु कौशलं सम्पादयेयुः इत्येवमुपदिशति गीता। स एव योगः।

- अवधानाय ध्यानाय, स्मृतिवर्धनाय, बुद्धेः विकासाय च योगस्योपादेयता।

**सन्दर्भग्रन्थसूची -**

1. पतंजलि, योगदर्शन, सम्पादकः हरिहरानन्द आरण्यक लखनऊ।
2. प्रतिभा यादव (2003) ''पातंजल योगदर्शन एवं आधुनिक शिक्षा'' एच.पी. भार्गव, बुक हाउस, आगरा
3. मणि शर्मा (2000) ''समकालीन भारतीय शिक्षा का स्वरूप तथा सम्भावनाएँ'' एच.पी. भार्गव, बुक हाउस, आगरा।
4. लक्ष्मी शुक्ला (1998) ''भारतीय मनोविज्ञान'' विद्यानिलयम्, दिल्ली।

**शोधछात्रा**
**जगद्गुरु-रामानन्दाचार्य-राजस्थान-संस्कृत-विश्वविद्यालयः, जयपुर**

# व्याकरणदर्शने सृष्टिप्रकारः

❑ विजय कुमार

विवर्तवादेनैव सृष्टिविषये शाब्दिकानां का दृष्टिरिति स्फुटप्रायमेव। एतत् प्रतिपादितमस्ति यत् यल्लोष्ठधूमादयः पृथिवी-जलादीनां परिणामा इति अनयैव दिशा अखिलमपि स्थूलपृथिवीजलादिकं परिणाम इति गम्यते, तदिदं स्थूलपृथिवीस्थूलजलादिकं च कस्योपादानस्य परिणामः, कान्येषां परिणामोपादानानि इति पृथिवी-जलादीनां भूतानामाविर्भावः स्वीक्रियते।

गन्धतन्मात्रमेव स्थूलपृथिवीरूपेण परिणमति। एवं रसतन्मात्रादिकमेव स्थूलजलादिरूपेण। एतान्येव च गन्धरसादितन्मात्राणि सूक्ष्मपृथिवीतत्त्वसूक्ष्मजलतत्त्वा-दिशब्दैर्व्यपदेष्टुं शक्यन्ते। आरम्भवादिभिः वैशेषि-कादिभिस्तु गन्धतन्मात्ररसतन्मात्रादिस्थानीयाः पृथिवी-जलादीनां परमाणवोऽभ्युपगम्यन्ते।

एतेभ्यः स्थूलपृथिव्यादीनामारम्भः (उत्पत्तिः) आस्थीयते। एतेषां च पृथिव्यादिपरमाणूनां कूटस्थ-नित्यतापि ऊरीक्रियते। सांख्यनये पुनः स्थूलपृथिव्याद्यु-पादानभूतानि वैशेषिकनयीयपरमाणुदेशीयानि सूक्ष्म-पृथिव्यादिशब्दव्यपदेश्यानि गन्धादीनि तन्मात्रादीनि प्रकृतेः परिणामा एव न तु मौलिकानि तत्त्वानि। शाब्दिकनयेऽपि स्थूलपृथिव्यादीनां परिणमनविषये साङ्ख्यदर्शनीयपरिणामाः स्थूलपृथिव्यादयः। परमेतानि तन्मात्राणीह शब्दपरमाणुस्पर्शपरमाण्वादिपदैर्व्य-पदिश्यन्ते तदाह हरिः-

**अणवः सर्वशक्तित्वाद्भेदसंसर्गवृत्तयः।**<br>
**छायातपतमः शब्दभावेन परिणामिनः।।**<br>
**स्वशक्तौ व्यज्यमानायां प्रयत्नेन समीरिताः।**<br>
**अभ्राणीव प्रचीयन्ते शब्दाख्याः परमाणवः[1]।।**

परं साङ्ख्यदर्शनापेक्षया अत्रायं विशेषो वर्तते यत् साङ्ख्यनये रसगन्धादीनि तन्मात्राणि परमार्थसतो मूलतत्त्वस्य प्रधानस्य परिणामाः। अत एव च तेषां पारमार्थिकी सत्ता। इह तु एते अणवः परमार्थसतो मूलतत्त्वस्य शब्दब्रह्मणो विवर्तः। अत एव चैषां व्यावहारिकी सत्ता। इदत्र विस्मर्तव्यं यदेतेऽपि शब्दस्य परिणामोऽयमिति कारिकोक्तरीत्या उक्तकारिकायां व्याख्यातस्य शब्दब्रह्मण आद्यविवर्तभूतस्य शब्दतत्त्वस्य परिणामा एव। इत्त्थं च वैशेषिकदर्शनापेक्षया स्थूलपृथिव्यादिसृष्टिविषये वैषम्यम्। वैशेषिकैरपि परमाणुभ्यः सृष्टिरभ्युपगम्यते। शाब्दिकैरपि च परमाणु-स्थानीयेभ्यो गन्धरसाद्यणुभ्यः सूक्ष्मेभ्यः पृथिवीजलादि-तत्त्वेभ्यः स्थूलपृथिव्यादीनां सृष्टिरास्थीयत एव। इयानेव विशेषो यद्वैशेषिकनये परमाणवो मूलभूतानि तत्त्वानि परमार्थसन्तः कूटस्थनित्याश्च तेभ्यश्च पृथिव्यादीनां प्रथमतः असतामेवोत्पत्तिः। इह पुनरेतेषामणूनां व्यावहारिक्येव सत्ता नित्यता च व्यावहारिक्येव। एभ्यश्च स्थूलपृथिव्यादीनां परिणमनं (आविर्भावः) न तूत्पत्तिः (आरम्भः)।

**उत्क्षेपणं गर्भगतस्य पादयोः**<br>
**किं कल्पते मातुरधोक्षजागसे।**

**किमस्तिनास्तिव्यपदेशभूषितं**

**तवास्ति कुक्षेः कियदप्यनन्तः[2] ।।**

अर्थादत्र प्रतिपादितमस्ति यत्-हे परमात्मन्! यदा शिशुः मातुर्गर्भे भवति तदा स अज्ञानवशात् पद्भ्यामुत्क्षेपणं करोति। एतत्तु नैव तस्य शिशोरपराधो वर्तते। एवमेव संसारे स्थिताः सर्वे पदार्थाः येषां विषये अस्तिचर्चा नास्तिचर्चा च भवति ते पदार्थाः सर्व एव भगवति कुक्षे एवान्तस्स्थिताः सन्ति। अनेन ज्ञायते यत् यथा शब्दब्रह्मण्येव सर्वशब्दपदार्थानां स्थितिः वर्तते, सकलशब्दराशिः शब्दब्रह्मण्येवान्तर्भवति, शब्दब्रह्मणा एव तेषां सृष्टिः अभिव्यक्तिः क्रियते, तथैव संसारस्थसकलचराचरपदार्थानां स्थितिरपि भगवत्येव वर्तते। भगवता एव तेषां सृष्टिः क्रियते।

**सत्त्वं रजस्तम इति स्थित्युत्पत्त्यन्तहेतवः।**

**रजसोत्पद्यते विश्वमन्योन्यं विविधं जगत्[3] ।।**

अर्थादत्र प्रतिपादितमस्ति यत्-अस्य संसारस्योत्पत्तेः कारणभूतः रजोगुणोऽस्ति। एवमेव स्थितेः कारणभूतः सत्त्वगुणोऽस्ति। एवञ्च विनाशस्य कारणं तमोगुणो वर्तते। एवमेव अस्य विविधतां समाश्रितस्यास्य जगतः कारणं स्त्रीपुरुषसंयोगद्वारकः रजोगुणो वर्तते। अनेन ज्ञायते यत् यथा शब्दब्रह्मणः विवर्तभूतस्यास्य सकल-शब्दजातस्य लिङ्गव्यवस्थायां सत्त्वरजस्तमसां हेतुता वर्तते। एतेषां गुणानामुपचयात् पुँल्लिङ्गो भवति। अपचयात्स्त्रीलिङ्गः साम्यावस्थावशान्नपुंसकलिङ्ग-व्यवस्था भवति। तथैव विष्णुरूपब्रह्मणो विवर्तभूतस्यास्य संसारस्य सृष्टिव्यवस्थायां सञ्चालनव्यवस्थायाञ्च सत्त्वरजस्तमसां हेतुता वर्तत एव। संसारस्य स्थितिः सत्त्वगुणात्, उत्पत्तिः रजोगुणात् अन्तश्च तमोगुणाद्भवति।

**यो दुर्विमर्शपथया निजमाययेदं**

**सृष्ट्वा गुणान्विभजते तदनुप्रविष्टः।**

**तस्मै नमो दुरवबोधविहारतन्त्र-**

**संसारचक्रगतये परमेश्वराय[4] ।।**

अर्थादत्र प्रतिपादितमस्ति यत्-यः परमेश्वरः परब्रह्म वा अचिन्त्यमार्गभूतया स्वमायया अस्य संसारस्य सृष्टिं करोति। संसारस्य सृष्टिं कृत्वा संसारे प्रविशति च। प्रविष्टो भूत्वा कर्मणां कर्मफलानां च विभाजनं करोति। अस्य संसारस्य व्यवस्थासञ्चालने तस्य ब्रह्मणो लीलातिरिक्तं किमप्यन्यकारणं नास्ति। अत एव तस्मै ब्रह्मणे नमः। अनेन ज्ञायते यत् यथा शब्दब्रह्मणा स्वशक्त्या सकलशब्दराशेरभिव्यक्तिः क्रियते। अर्थात् शब्दब्रह्म यदा जलाहरणरूपयोग्यताशक्तिं समाश्रयति तदा घटरूपेणा-भिव्यक्तिर्भवति। यदा च आवरणरूपयोग्यताशक्तिं समाश्रयति तदा पटरूपेणाभिव्यक्तिर्भवति। तथैव विष्णुरूपब्रह्मणा स्वशक्त्या मायाख्यया सकलजगत उत्पत्तिः सृष्टिर्वा क्रियते। अर्थात् संसारस्योत्पत्तिं कृत्वा तदनुप्रविष्टः सन् कर्मणां कर्मफलानां वा विभाजनं करोति।

**शोधच्छात्रः**

**व्याकरणविभागः**

**राष्ट्रियसंस्कृतसंस्थानम्, जयपुरपरिसरः**

1. भर्तृहरेः वाक्यपदीये ब्रह्मकाण्डे 110.111
2. श्रीमद्भागवतमहापुराणे दशमस्कन्धे 14.12
3. श्रीमद्भागवतमहापुराणे दशमस्कन्धे 24.22
4. श्रीमद्भागवतमहापुराणे दशमस्कन्धे 49.29

# भाषाधिगमप्रक्रमः

❑ द्वारिका प्रसाद तिवारी

भाषा भावाभिव्यक्तेः साधनं वर्तते। भाषां विना कोऽपि जनः भावाभिव्यक्तिं सहजतया न कर्तुं शक्नोति। भाषा परिष्कृता शुद्धा, ललिता सर्वग्राह्या च स्यादिति विषयः वर्तते महत्वपूर्णः। अत्र तावत् चिन्तनीयः विषयः वर्तते यत् भाषायाः प्रयोगः कथं स्यात्, येन सहजतया भाषाप्रयोग-कौशलं समुत्पद्येत। भाषायाः सरलतया सहजतया अवगमनाय भाषाकौशलानां क्रमशः परिपालनम् अत्यन्तम् अपेक्षितं विद्यते।

यदि भाषायाः प्रयोगः क्रियेत तर्हि अवश्यं शनैः शनैः सः मार्गः प्रशस्तः भवति। यतः यावत् भाषाश्रवणं भवितुं नार्हति। श्रवणभाषणयोः अभावे कदापि पठनं लेखनं च भवितुं नार्हति। सर्वप्रसिद्धं भाषायाः कौशलचतुष्टयं विद्यते। एतेषु चतुर्षु भाषाकौशलेषु प्रयोगसामर्थ्यम् अपेक्षितं विद्यते। तन्निमित्तं दृढतया लक्ष्यपुरस्सरं श्रमः अपेक्षितो भवति। यदि सर्वेषां कौशलानां क्रमशः पालनं विधीयते तर्हि अवश्यं भाषाप्रयोगः कर्तुं शक्यः।

भाषाप्रयोगविज्ञानं नाम भाषायाः प्रयोगः श्रवण-भाषण-पठनलेखनकौशलानां प्रयोगसम्बद्धः वर्तते यदि सर्वेऽपि जनाः कौशलक्रमेण भाषायाः अध्ययनं कुर्वन्ति तर्हि भाषायाः चतुर्षु कौशलेषु विकासः जायते। भाषायाः अनेकाः परिभाषाः विद्यन्ते यासां माध्यमेन भाषाशब्दः स्पष्टतां प्राप्नोति। भारतीयः आचार्यः पतञ्जलिः अकथयत्- येन ध्वनिना पदानाम् अर्थः प्रतीयते, सः ध्वनि भाषा इति उच्यते। भाषामेव स्पष्टीकुर्वन् मङ्गलदेवशास्त्रिवर्य अकथयत् "भाषा मनुष्याणां सा चेष्टा यया मानवः स्वोच्चारणोपयोगिभिः शरीरावयवैः उच्चारितानां पदानां माध्यमेन स्वविचारान् प्रकटयति" इति।

भाषायाः मुख्यरूपेण आधारद्वयं विद्यते - भौतिकाधारः मानसिकाधारश्च। यदि भौतिकाधारः मानसिकाधारश्च सुचिन्तितौ न स्तः तर्हि कदापि भाषायाः ज्ञानं न भवति। भौतिकाधारो नाम ताल्वादि- उच्चारण-स्थानानां परिज्ञानेन विद्यते। मानसिकाधारो नाम चिन्तनं विद्यते। उच्चारणस्थानानां चिन्तनस्य च अभावे कदापि प्रयोगविज्ञानं भाषायाः सुस्थिरं भवितुं नार्हति। अतः भाषायाः उत्तमप्रयोगाय विषयद्वयम् आधाररूपेण उच्यते। तयोः ज्ञानं सुतराम् ईहितं विद्यते। भाषायाः प्रयोगाधारितानि अपि अनेकानि रूपाणि विद्यन्ते। येषां माध्यमेन विशिष्टं परिज्ञानं छात्राणां कृते जायते तानि रूपाणि विद्यन्ते यथा- साहित्यिकी, लौकिकी, वैज्ञानिकी व्यावसायिकी, अपभाषा, साधुः असाधुः च। अनेन क्रमेण भाषायाः अनेकानि रूपाणि विद्यन्ते।

साहित्ये यस्याः भाषायाः प्रयोगः दृश्यमानः भवति, सा भाषा साहित्यिकी भाषा भवति। एवमेव सर्वत्रापि भिन्न-भिन्न-भाषायाः प्रयोगः जायते इति स्पष्टमेव।

भाषायाः प्रयोगविज्ञानम् अस्माभिः द्विधा चिन्त्यते यतः व्याकरणदृष्ट्या भाषायाः प्रयोगचतुष्टयं दृश्यते। तदेव उत्तरे वाच्यरूपेण अङ्गीक्रियते तच्च वाच्यचतुष्टयं - कर्तृवाच्यं कर्मवाच्यम्, भाववाच्यम्, कर्तृकर्मवाच्यं च। अत्र हि वाच्यस्थाने प्रयोगशब्दः उच्यते। अतः अत्रापि किञ्चन विज्ञानं विद्यते एव। येन विज्ञानेन निर्णयो जायते द्विकर्मकधातूनां प्रयोगकाले कुत्र प्रथमा विभक्तिः कुत्र च तृतीया विभक्तिः जायते इति। किन्तु अस्मिन् लेखे व्यवहारगतप्रयोगविज्ञाने विचिन्त्य चर्चा विधीयते भाव-व्यवहारगतप्रयोगविज्ञानस्यापि सोपानचतुष्टयं चिन्तयितुं शक्यते। तत्र हि धाराप्रवाहिता, शुद्धता, शब्दसम्पत्तिः, शैलीसम्पादनं च वर्तन्ते। एतेषां सोपानानां क्रमशः विकासः अपेक्षितो भवति। धाराप्रवाहिता शुद्धता च सोपानद्वयम् आरम्भिकं विद्यते शब्दसम्पत्तिः शैलीसम्पादनं च सोपानद्वयम् उच्चस्तरीयं विद्यते, यस्य विकासः आजीवनं करणीये भवति। अनयोः विकासः प्रयत्नबलेनैव भवितुमर्हति।

धाराप्रवाहितायै पूर्वकार्याणि अनन्तरकार्याणि च द्विधा भवन्ति। पूर्वकार्येषु दैनन्दिनशब्दानां, क्रियापदानां च लघुकथानां पठनं, सम्भाषणशिविरेऽध्ययनं च अपेक्षितं विद्यते। यतः ज्ञायते एव साम्प्रतं संस्कृतभाषा व्यवहारिक-

रूपेण अल्पमात्रायां दृश्यते अतः आरम्भे एतानि कार्याणि श्रवणकौशलस्य विकासाय करणीयानि एव। तथैव धाराप्रवाहितायै अनन्तरकार्यचतुष्टयम् आन्तरिकरूपेण प्रत्येकं भाषाज्ञानस्य इच्छुकेन करणीयम्। तच्च धैर्यं सङ्कोचत्यागः, भाषाश्रद्धा, भाषायां रुचिः। यतः साम्प्रतिके काले जनानां संस्कृतं श्रोतुं धैर्यमेव न भवति। यदा नूतनजनं प्रति संस्कृतेन व्यवहारः क्रियते तदा तस्य महत्कष्टं जायते। सः सहसा कथयति- ''नाहं जाने संस्कृतेन हिन्द्या आङ्ग्लभाषया वा व्यवहारं कुर्याम् इति।'' यावत् धर्मेण श्रोतुं सामर्थ्यं नोत्पद्यते तावत् संस्कृतस्य ज्ञानं न वर्धते। तथैव सङ्कोचत्यागः वर्तते महत्वपूर्णः यतः केऽपि चिन्तयेयुः यदा अहं शुद्धतया वक्तुं शक्नुयाम् तदा एव संस्कृतेन व्यवहारं करिष्यामि एवं शुभदिनं कदापि भवितुं नार्हति यतः भाषा भाषणेनैव आयाति। अतः आरम्भिकस्तरे केवलं व्यवहारः करणीयः भवतु नाम दोषः भाषणे। एवमेव रुचिः श्रद्धा च महत्त्वपूर्णे स्तः यया भाषया अध्ययनं क्रियते तां प्रति रुचिः श्रद्धा नास्ति तर्हि कदापि जीवने सा भाषा हस्तगता न भवति इति। यावत् धाराप्रवाहिता पूर्णरूपेण नायाति तावत् शुद्धतायाः विषये चिन्तनं नैव विधातव्यम्। यदा धारा प्रवाहिता आगता तदा शुद्धतायाः सन्दर्भे चिन्तनं करणीयम्।

द्वितीयसोपानं विद्यते शुद्धता इति। शुद्धतायै विषयद्वयं ज्ञातव्यं भवति। वाक्यज्ञानं, व्याकरणज्ञानं च। वाक्यज्ञानरूपेण बहवः तादृशाः दोषाः भवन्ति। ये मातृभाषाकारणेन, अज्ञानकारणेन, अनवधानकारणेन च जायन्ते। तेषां निर्माणं शनैः शनैः शुद्धिकौमुदीभाषापाठादीनां पुस्तकानाम् अध्ययने करणीयम्। तत्रैव शुद्धतायै व्याकरणज्ञानम् अपेक्षितं विद्यते। यत्र हि क्रमशः कारक-सन्धि-समास-तद्धित-कृत्-स्त्रीप्रत्यय-सुबन्त-तिङतादीनां सुस्थिरं ज्ञानं परमापेक्षितं विद्यते। अतः व्याकरणज्ञानं विना शुद्धता कदापि भवितुं नार्हति। अतः शुद्धता प्रारम्भिकस्तरे आवश्यकी विद्यते इति।

उच्चस्तरीयं सोपानम् उत सोपानं विद्यते शब्दसम्पत्तिः शब्दसम्पत्तिं विना नूतनप्रयोगाः भवितुं नार्हन्ति। शब्दसम्पत्तिवर्धनाय निरन्तरप्रयत्नस्य आवश्यकता भवति। तन्निमित्तं कोषग्रन्थानां पठनं महत्त्वपूर्णं वर्तते। तत्र हि अमरकोषः, आप्टेकोषः संस्कृतभारतीकोषः, हिन्दी-अंग्रेजीशब्दकोषः, शब्दकल्पद्रुमः मेदिनीकोषः, विभिन्न-ग्रन्थानां व्याख्या चेत्यादयः विषयाः कोषाः वा शब्दसम्पत्तये पठनीयाः। शब्दसम्पत्तिः तु शनैः शनैः वर्धते। यथा प्रयोगबाहुल्यं जायमानं भवति तदनुगुणमेव शब्दसम्पत्तिः वर्धते इति।

प्रयोगविज्ञानवर्धनाय अन्तिमं सोपानं वर्तते शैली-सम्पादनम्। शैलीसम्पादनं नाम शब्दसौष्ठवपुरस्सरम् आकर्षकतया लेखनं विद्यते। तन्निमित्तं श्रमः अपेक्षितो भवति। तत्र हि आधुनिक उपन्यासानां पठनम्। प्राचीनोपन्यासानां पठनम्। यदि आधुनिकप्राचीनोपन्यासानां निरन्तरं पठनं विधीयते। तर्हि शनैः शनैः शैल्याः समुत्पादनं भवति। तथा हि विभिन्नग्रन्थानां पठनात्परं शास्त्रीयोत्तम प्रयोगाणां स्वव्यवहारे प्रयोगेणापि शैलीसम्पादनं जायते। सर्वाधिकं शैलीसम्पादनं तु स्वभाषया अन्यग्रन्थानां रटितवाक्यानां प्रयोगेण जायते। अतः शैलीसम्पादनं यः इच्छति सः प्रयोगाणाम् अन्वेषणशक्तिं वर्धयेत्। आरंभिक-सोपानद्वयस्य विकासार्थं भाषाकौशलस्य सोपानद्वयं श्रवणं भाषणं च अपेक्षितं भवति। अनन्तरसोपानद्वयस्य विकासाय पठनं लेखनं च भाषाकौशलद्वयं नितराम् अपेक्षितं भवति।

प्रत्येकं भाषा व्यवहाराधीना भवति। कापि भाषा निरन्तरं व्यवहारे वर्तते तर्हि तस्याः कथमपि समाप्तिः न सम्भवा, भाषा व्यवहारे नास्ति चेत् कथमपि तस्याः उत्कर्षः अग्रे नयनं च नितरां परिश्रमाधीनं विद्यते इति।

**शोधार्थी**
**राष्ट्रियसंस्कृतसंस्थानम्**
**( मानितविश्वविद्यालयः ) जयपुरम्**

**सन्दर्भग्रन्थाः -**

1. संस्कृतशिक्षणम्, डॉ. श्रीमती सन्तोषमित्तलः, नवचेतना पब्लिकेशन, जयपुर, प्रथम संस्करणम्, 2006
2. संस्कृतशिक्षणम् डॉ. उदयशंकरझा, चौखम्भाप्रकाशन, प्रथम संस्करणम्, 2011, दरियागंज, नई दिल्ली।
3. व्याकरणमहाभाष्य- पतञ्जलि, चौखम्भाप्रकाशनम्।
4. अध्यापन में श्रव्य दृश्यसाधन, एडगरडेल, हरियाणा साहित्य अकादमी, चण्डीगढ, प्रथम संस्करणम्-1987.

पुस्तकसमीक्षा

# विदुषां संस्कृतपत्राचारः

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

संस्कृतभाषा अमरभाषाऽस्ति, जीविता जाग्रती च भाषाऽस्ति। अस्यां हि विदुषां पत्राचारः पूर्वं सानन्दं भवति स्म। विद्वद्भिः स्वकीये पत्राचारे गद्यस्येव पद्यस्यापि प्रयोगः क्रियतेस्म। एवंविधः पत्राचारो विरलोऽद्यत्वे किन्तु गतशताब्द्यां सुभृशं संजातोऽभूत् संस्कृते पत्त्रसंवादः पण्डितेषु। एवंविधस्य पत्राचारस्य सुतरां प्रेरकं सङ्कलनं सपद्येव प्रकाशितमिति ज्ञात्वा सविस्मयमानदमनुभविष्यन्ति सुधियः। ''विदुषां पत्रपिटकानि'' शीर्षके संकलनेऽस्मिन् 1935 ई. वर्षतः 2019 ई. वर्षपर्यन्तं विभिन्नैर्विद्वद्भिर्लिखितानि पत्राणि संगृहीतानि। परस्परं सम्बोधितेष्वेषु पत्रेषु गद्यमप्यस्ति, पद्यबद्धानि पत्राण्यपि सन्ति।

येषां पत्राचारः प्रमुखरूपेण संगृहीतोऽत्र ते सन्ति महामहोपाध्याय पं. गिरिधरशर्मचतुर्वेदिवर्याः, पं. दुर्गादत्त उपाध्यायाः, प्रो. वेंकटाचलम्, प्रो. राधावल्लभ-त्रिपाठिवर्यश्च। 185 वर्षेषु लिखितानि 357 गद्य-पद्य मयानीमानि पत्राणि पत्रलेखनकलामपि प्रतिनिदधति, तत्कालीनां स्थितिमपि द्योतयन्ति। परस्परं सुहृदां पत्रव्यवहारे कीदृशी अभिव्यक्तिर्विलोक्यते स्मेति पत्राणीमानि द्योतयन्ति। विदुषां व्यक्तिगतेभ्यः पत्रसंग्रहेभ्यः संस्कृतपत्राणां प्राप्तिः, चयनं, प्रकाशनं च सुतरां प्रेरकं कार्यं भवति। कार्यमिदं कृतवान् संस्कृतजगति सुपरिचितः प्रभूतग्रन्थप्रकाशको डॉ. सूर्यप्रकाशव्यासः सर्वात्मना वर्धापनमर्हति। तेन सह डॉ. तुलसीदास परौहा अपि सम्पादनमस्य ग्रन्थस्य कृतवान्।

ग्रन्थस्य सम्पादनं समुल्लेखनीयप्रतिभया कृतमस्ति। पूर्वं प्रमुखाणि पञ्चपिटकानि पूर्वसूचितानां पञ्चविदुषां पत्रसंग्रहान् संगृह्णन्ति। पं. गिरिधरशर्माणः स्वयं संस्कृतस्य विश्रुताः प्रचारकाः पुरोधसश्चाऽऽसन्। तेभ्यो विभिन्नैः सुहृद्भिर्लिखितानि पत्राणि सुतरां प्रेरकाणि येषु संस्कृतरत्नाकरसम्पादकानां भट्टश्रीमथुरानाथशास्त्रिणां, संस्कृतचन्द्रिकासम्पादकानां श्री अप्पाशास्त्रीराशिवडे-कराणामन्येषां च सुप्रथितानां विदुषां पत्राणि परिगणयितुं शक्यन्ते। सुविशालमिदं प्रथमं पत्रपिटकम्। विशालतर-मस्ति दुर्गादत्तोपाध्यायानां पत्रपिटकमपि यत्र बटुकनाथ-शास्त्रीखिस्ते, वसन्त शेवडे, शिवजी उपाध्याय प्रभृतीनां प्रभूतः पत्रसंभारः।

इत्थं संस्कृते पत्रव्यवहारस्येतिहासं प्रस्तुवन्नयं ग्रन्थः संस्कृतजगति सुतरां समाद्रियेतेति स्पष्टमेव। परिशिष्टे विल्किन्सन, विल्सनप्रभृतीनामाङ्गलविदुषां सुप्रथितानि कतिपयपत्रोद्धरणानि मुद्रितान्यत्र।

**विदुषां पत्रपिटकानिः सम्पादकौ डॉ. सूर्यप्रकाश व्यासः, डॉ. तुलसीदास परौहा, प्रकाशकः डॉ. सूर्यप्रकाशव्यासः, 1, अथर्वविहार, इन्दौर रोड, उज्जैन पृ.सं. 313, मू. 500/-**

### स्मृतिकथाः

संस्कृतभाषायां सुविशालं, चिरन्तनं च कथा-साहित्य-मस्तीति सुविदितं तथ्यम्। पञ्चतन्त्रादयो ग्रन्था विश्वविदिताः सन्ति येषां प्रचारः प्राचीनतमे कालेऽप्यासीत् येषां च प्रेरणयाऽनेकेषु देशेषु कथासाहित्यस्य सरित् प्रावहदित्यपि सुविदितं तथ्यम्। प्रतियुगं संस्कृते कथा व्यलेख्यन्त। कथासरित्सागरादयो ग्रन्थाः सुतरां लोकप्रिया अभूवन्नद्यापि चाधीयन्ते। पद्यबद्धा गद्यबद्धाश्चेति द्विविधाः कथाः, प्रतियुगं कथाकारैः प्रास्तूयन्त।

आधुनिके युगेऽपि दीर्घकथाः, लघुकथाः, बोध-कथाः, हास्यकथा इत्यादि भेदवाहिन्यः कथा व्यलेख्यन्त कथाकारैः यासां प्रकाशनं पत्रपत्रिकासु भवति स्म। ''कथासरित्'' पत्रिका तु संस्कृते कथासाहित्य-सृष्टिमेवोद्दिश्यानेकेभ्यो वर्षेभ्यः प्रसरतीति जानन्त्येव सुधियः। एवंविधैः पदन्यासैर्बहुविधाः कथाः प्रवर्तन्ते। अन्यभाषावत् संस्कृतेऽपि स्पशकथाः प्रारभ्यन्त। ललितनिबन्धसादृश्यं वहन्त्या ''ललितकथायाः'' सृष्टिरपि नवीनेऽस्मिन् युगे संजाता। मदीया ''ललितकथाकल्पवल्ली'' प्रस्तुतवती तादृशीः कतिपयललितकथाः।

एवंविधानां कथाविधानामेको नूतनः प्रकारः प्रकाशमायातो यः ''स्मृतिकथा'' रूपेण प्रसिद्धि-माप्स्यतीति विज्ञाय प्रमोदेयुः पाठकाः। स्वजीवने कतिपयाः स्मृतीः कथारूपेण यदि कथाकारोऽभिलिखति सा स्मृतिकथाऽपि रुचिकरी स्यादेव। मया ''आत्मकथा'' एका विधा सुपरिचिता तथा स्मृतिकथाऽपि सुपरिचिता सेत्स्यति। कथासरित् पत्रिकायाः प्रकाशनेन प्रसिद्धिं प्राप्तया संस्थया ''कथाभारती'' नाम्न्या सुप्रथितस्य साहित्यकारस्य विदुषो डॉ. हर्षदेमाधवस्य तादृश्य एव 32 स्मृतिकथाः संग्रहे एकस्मिन् सपद्येव प्रकाशिताः सन्ति यस्य नामधेयमस्ति ''स्मृतीनां जर्जरितानि पृष्ठानि।''

एतासु 32 स्मृतिकथासु कथाकारेण स्वकीयानि संस्मरणानि कथारूपेणोपनिबद्धानि। निर्धनजीवनं ससंघर्षं वहन्ति चरित्राणि, रावणस्य लीलां कुर्वाणोऽभि-नेता, भर्जकविक्रेता अम्बारामः, कलाकारो दोस्त-मोहम्मदः, क्रूरहृदयः कविः इत्यादि वस्तुजातं यथास्मृति प्रस्तुवन्त्य इमाः स्मृतिकथा जीवनस्य वास्तविकं रूपं प्रस्तुवन्तीति पाठकः स्वयमनुभविष्यति। स्मृतिकथाना-मिदं संकलनं नूतनामेकां कथाविधां प्रस्तौतीत्यस्य स्वागतं संस्कृतजगति सुनिश्चितमेव भविता। अभिनन्दामो लेखकवर्यं ''भारत्याः'' सुपरिचितं विद्वांसं डॉ. हर्षदेव माधवं, प्रकाशिकां ''कथाभारतीं'' च।

**स्मृतीनां जर्जरितानि पृष्ठानि - लेखकः हर्षदेव माधवः, प्रकाशिका कथाभारती, प्लाट नं. ए/112 नर्मदा कंप्लेक्स, ग्रीनपार्क नरेन्द्रपुर, कोलकाता सम्पादकः नारायणदाशः पृ.सं. 95 मू. 200/-.**


## ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-

**भारती पत्रिका का वार्षिक शुल्क रुपये 120/–, पंचवर्षीय शुल्क 500/–, आजीवन सदस्यता (15 वर्ष) शुल्क 1500/– मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई–मेल से या डाक द्वारा भिजवा देवें।**

**खाते का नाम – भारती**

**खाता संख्या – 2139101912502**

**IFS Code - CNRB0002139**

# अस्माकं गुरवः

( गताङ्कादग्रे )

❑ वेणीमाधव गो. धर्माधिकारी

**नयपालराष्ट्रेण भावबन्धनम्**

श्रीमन्तो गुरवः 1963 ई. वर्षे जनवरी मासस्य 20 दिनाङ्के शिवरात्र्याः शुभेऽवसरे नयपालस्य काठमाण्डू-स्थाने भगवतः पशुपतिनाथस्य दर्शनार्थं गताः। तदनन्तरं तत्रत्यमहाराजेन महेन्द्रेणापि मिलिताः। तस्मिन् समये तत्रत्याः प्रधानमन्त्रिणः तुलसीगिरि-महोदया अपि उपस्थिता आसन्। 1962 ई. वर्षस्य चीनाक्रमणे भारतस्यापमानजनकपराभवेन नयपालस्य चीनदेशं प्रति भावबन्धनमिव जातमासीत्। भारतं प्रति नयपालनरेशस्य अन्योऽप्याक्रोशआसीत्। श्री गुरुमहाभागैराश्वासनं प्रदत्तं यत्ते भारतस्य शासकान् इदं सर्वं कथयिष्यन्ति। काठमाण्डूस्थानात्परावृत्यागत एव श्रीमन्तो गुरुमहा-भागाः लालबहादुरशास्त्रिणं पं. नेहरुमहोदयं च पत्रं विलिख्य नयपालनरेशेन सह सम्मेलनस्य सर्वं वृत्तं विस्तरेण सूचितवन्तः। परामर्शोऽपि प्रदत्तः यद् भारतस्य नयपालं प्रति सौहार्दपूर्णो व्यवहार आवश्यकः। तथा च चीनदेशस्य विस्तारवादिनीति-विरुद्धं नयपालदेशनरेशं विश्वस्तं कर्त्तुमावश्यकमस्ति। अस्य पत्रस्य त्वरितमेव 1 मार्च दिनाङ्के उत्तरे नेहरूमहोदयैः स्वीकृतः परामर्शः त्रुटिश्च स्वीकृता। भूयश्च यदा 1965 ई. वर्षे अटलविहारि महोदयाः लालबहादुरशास्त्रिणा मिलितास्तदा तैः कथितं मम नयपालप्रवासात्पूर्वमेव गुरुमहाभागैर्मे 3/4 कार्यं पूर्णं कृतम्।

1965 ई. वर्षस्य 14 जनवरी दिनाङ्के मकरसङ्क्रमणोत्सवस्याध्यक्षतापि स्वीकृतासीत् परं भारतसर्वकारस्य क्षुद्रेण मनसा संकेतः कृतः यदस्मिन्ना-गमनं नोचितं भविष्यति। नयपालमहाराजमहोदया अपि अति दुःखिता अभवन्। अन्ते च तैः अतीव प्रेरणादायकः सन्देशः उत्सवार्थं प्रेषितः। सर्वकारस्यैतस्याः कुत्सित-नीतेः कपियसमाचारपत्रैरपि टीका कृता।

**निर्भयं संशयातीतं च विवेचनम्**

1965 ई. वर्षे पाकस्थानेन पुनः कश्मीरप्रदेशे आक्रमणं कृतम्। अनेन सहैवास्माकं देशस्य समस्तेऽप्युत्तरपश्चिमे सीमाप्रदेशे युद्धं प्रारब्धम्। तेषु दिवसेषु भारतस्य प्रधानमंत्रिणः लालबहादुरशास्त्रिण आसन्। तैस्त्वरितमेव परामर्शार्थं देशस्य प्रमुखनायकानां सम्मेलनमाकारितम्। तस्मिन् राजनैतिकनायकातिरिक्तं गुरुमहाभागा अप्याहूताः। तस्मिन्समये महाराष्ट्रे प्रवासरतानां गुरुमहाभागानां कृते विशिष्टं विमानमपि प्रेषितम्। तस्मिन् विचारविमर्शे भारतस्य युद्धनीतेर्मूलसूत्रं कीदृशं स्यादिति चर्चा प्रचलिताऽऽसीत्। तस्मिन् समये गुरुमहाभागैः कथितम्-पाकस्थानस्य केवलं युद्ध-संभारनाशादेव कार्यं न भविष्यति प्रत्युत तस्यास्ति-त्वस्यैव नाशः स्याद् येन सर्वदार्थं संकटमुक्तिः स्यात्। तैः स्पष्टमिदमुक्तम् कश्मीरप्रदेश एव न सर्वेष्वेव प्रदेशेषु भारतेन विजिताः प्रदेशाः भारताधीना एव स्युः। ईदृशोऽसंदिग्धो विचारस्तैर्निर्भीकतया प्रस्तुतः।

**1971 ई. वर्षेभारतस्य सेनायाः वैश्विकं कीर्तिमानम्**

परं भारतसर्वकारेण गुरुमहाभागानां तादृशं विचारमुपेक्ष्य विजिताः प्रदेशा अपि प्रत्यर्पिताः येन पाकस्थाने सिन्धुप्रदेशवासिनो हिन्दवोऽपि शरणार्थिनः

सञ्जाताः। 1971 ई. वर्षे पश्चिमपाकस्थानस्य राक्षस्या नृशंसया सेनया पूर्वपाक स्थाने आक्रमणं विधाय तत्रत्याः कोटिशो हिन्दवो भारते प्रवेशिताः। तस्मिन् समये श्रीमत्या इन्दिरागान्धि-महाभागायाः दृढनिश्चयेन भारतीयसेना पूर्वपाकस्थाने प्रविष्टा। पश्यत एव पश्यतो भारतीयसेनया पाकसेनायाः हस्तपादभंगः कृतः। तथा च तां शरणागतार्थं बाध्यां कृतम्। अद्यापि विश्वस्य युद्धेतिहासेषु कदापि न श्रुतं नच पठितं एतादृशं विजयं भारतसेनया प्राप्तम्। पश्चिम-पाकस्थानस्य च 92000 सैनिकान् भारतस्याग्रे हस्तबद्धान् विधाय कोटिशो हिन्दवः पूर्ववत् स्थापिताः। तत्र च दुर्मदरहितसर्वकारस्य स्थापना विहिता। बङ्गदेश नाम्ना च नूतनं राष्ट्रमुदितम्।

श्रीमद्भिः गुरुमहाभागैः रक्षामंत्रिणे जगजीवनराम महोदयाय प्रेषिते पत्रे संदेशोऽयं लिखितः ''भवतां नेतृत्वे अस्माकं सेनाबलेन सम्पूर्णो विजयः प्राप्तः।'' विजयोऽयं स्वर्णाक्षरेषु लेखनीयः। मार्चमासे जाते संघस्य कार्यकारिमण्डलाधिवेशने युद्धे प्राप्तविजयस्य विषये प्रशंसात्मकः प्रस्तावोऽपि पारितः।

भारतीया जनता प्रसन्ना अभवत्। यथा पाकस्थान-नेतृभिर्भारतस्य विभाजनं कृतं तथैवाऽस्माभिः पाकविभाजनं कृतमिति। भारतस्य कृते च एकस्य मित्रदेशस्य निर्माणम् अभवत्। कतिपयदिनानन्तरं गुरवः कतिपयमित्रैः सह वार्ताप्रसङ्गे कथयन्तिस्म-अद्यत्वे मित्रवद् व्यवहारं कुर्वन्नपि भविष्ये हठपूर्णैर्जनैः शत्रुवद् व्यवहारश्चेद् विहितः भारतस्य कृते शत्रुद्वयमुपस्था-स्यति। उभयतः शत्रुरिति भयावहः प्रसङ्गः। अद्य बङ्गदेशो यथा शत्रुवद् व्यवहरति तेन ज्ञायते गुरुवाणी सत्यैवासीत्।

क्रमशः...

**ब्रह्मपुरी, जयपुरम्**

---

**प्रेरकप्रसङ्गशतकम्** — **द्व्यशीतितमः प्रसङ्गः**

# नामधेयमहत्त्वम्

❑ **सौ. आराधना धर्माधिकारी**

एका महिला स्वसख्याः गृहे स्वपुत्रस्य विवाह-निमन्त्रणपत्रं दातुमगच्छत्। तस्यै निमन्त्रणपत्रं दत्त्वा शीघ्रतावशादेकमतिरिक्तं निमन्त्रणपत्रमददात्। इदं तव गृहस्य पृष्ठभागे या वसति मण्डलसदस्या तस्यै देयम्। परं तत्र तु द्वे वर्तेते कस्यै देयम्? तया प्रश्नः कृतः। नामोपनामादि नाहं जानामि केवलमाकृत्या जानामि। आकृतिमेव दर्शय तर्हि व्यंग्येन तया कथितम्। तदा चलदूरभाषयन्त्रेण तया परिचयः कारितः।

आश्चर्यस्यायं विषयः यस्य महिलामण्डलस्य सा वर्षेभ्यः सदस्या तस्यान्यसदस्यानां नाम्ना परिचयोऽपि न प्राप्तः। एतादृशेन मण्डलेन को लाभः। जन्मानन्तरं महत्त्वपूर्णोऽयं संस्कारो नामकरणं नाम। तेनैव सर्वेषां परिचयो भवति। अतः केनापि मित्रेण नाम्ना परिचयः कर्तव्यः।

**218, धर्माधिकारिभवनं, ब्रह्मपुरी, जयपुरम्**

नारी-स्तम्भः

# करुणासिन्धुः सिन्धुताई

❏ डॉ. राजेश्वरी भट्ट

कदाचिदशन-वसनशयनादीनां जीवितस्य कृते अनिवार्यसाधनानां पूर्तये आदिवस रेलवेस्टेशन इति जनसंकुले स्थाने हस्तौ प्रसारयन्ती, आत्मनः शीलरक्षायै रात्रौ निर्जने श्मशाने शयाना सिन्धुताई, अपूर्वत्यागेन, समर्पणेन, औदार्येण च अद्य सहस्राधिकानां अशरणानां शरणस्थली मदरटेरेसा इति सेवासम्मानमधिगम्य न केवलं महाराष्ट्रप्रदेशे अपितु विश्वस्मिन् विश्वे विश्रुता जाता। अशरणानां सेवायै कृतसंकल्पा अन्वार्थ नाम्नी 'सिन्धुताई' 14 नवम्बर 1948 तमे वर्षे महाराष्ट्रप्रदेशे एकस्मिन् ग्रामे 'अभिमान साठे' नाम्नो निर्धनस्य पशुचारकस्य गृहे अवाञ्छिता-पुत्रीरूपेण जनिमलभत। गृहे 'चिन्धी' (फटे चिथड़े टुकड़ा) इति जन्म नाम्ना, पश्चात् सिन्धुताई नाम्ना विख्याता इयं परिवारे उपेक्षिता कन्या अर्थाभावादिभिरनेकैः कारणैः चतुर्थकक्षा पर्यन्तमेव शिक्षां प्राप्तवती। दशवर्षस्य अवस्थायामेव बालिकावध्वाः विवाहं त्रिंशद्वर्षीयेण वरेण हरिसपकालेन सह विधाय पितरौ स्वकर्तव्यादनृणौ जातौ। पतिगृहे गृहकार्याणि सम्पाद्य 'सिन्धुताई' धनार्जनाय श्रमिकरूपेण कार्यमकरोत्। कार्यस्थले प्रधानश्रमिकः धनवितरणसमये श्रमिकाणां शोषणमकरोत् स्वाभिमानिनी सिन्धुताई प्रधान-श्रमिकस्य दुष्प्रवृत्तिविषये उच्चाधिकारिणः कर्णपुटयोः सूचनां प्रापयामास। अनेन प्रधान-श्रमिकः क्रुद्धो जातः। प्रतिशोधरूपेण सः सिन्धुताई महोदयायाः पतिं स्वभार्यां गृहाद् बहिर्निष्कासयितुं बलाद् विवशं कृतवान्? निष्कासनसमये 'सिन्धुताई' आसन्नप्रसवाऽऽसीत्। पत्युः क्रूरकर्मणा कम्पिता, किंकर्त्तव्यविमूढा इयं पूर्वं तु मरणमेव मुक्ते-रुपायममन्यत, किन्तु गर्भस्थस्य बालकस्य विषये विचार्य धैर्यं धृत्वा मार्गे एकस्यां गोशालायां प्रविष्टा, तत्रैव पुत्रीमेकां प्रसूतवती। ततो साहसं संचित्य सिन्धुताई मातुर्गृहं प्रति उन्मुखा जाता किन्तु तत्राऽपि पिहितं द्वारं प्राप्य अनन्यगतिका, असहाया रेलवे स्टेशन इति स्थाने उदरपूर्त्यर्थं भिक्षाटने प्रवृत्ता जाता। तत्र धरागगनयोः संरक्षणे जीवनं यापयतः विविधैरङ्गसञ्चालनैः, हास्यवचनैश्च मार्गे गतागतं-कुर्वताम् जनानां मनोरञ्जनं कुर्वतः शरणविहीनान् बालकान् दृष्ट्वा करुणासिधुः सिन्धुताई तेषां संरक्षणाय प्रतिबद्धा जाता। ततः प्रभृति अनाथानां संरक्षणं मातृवत् पालनमेव महाभागाया जीवनक्रमो जातः। इदानीं सिन्धुताई महोदयायाः परिवारे 1050 बालकाः, 207 जामातारः, 268 वध्वः, सहस्रे-भ्योऽधिकाः पौत्राः पौत्र्यश्च सुखेन निवसन्ति। आश्रमे निवसतां बालकानां दिनचर्यायां व्यवधानं न भवेदिति विचार्य सिन्धुताई आत्मनः पुत्रीं अन्यस्मिन् आश्रमे प्रेषयामास। समुचिते संरक्षणे वर्धमाना सा कन्या सम्प्रति विधिविषयविशेषज्ञा वर्तते। एतदतिरिक्तं आश्रमे वसत्सु बालकेषु अनेके बालकाः सम्प्रति उच्चपदेषु कार्यरताः सन्ति। सेवाक्षेत्रे अपूर्वयोगदानेन 'सिन्धुताई' प्रायः 273 राष्ट्रिय अन्ताराष्ट्रिय पुरस्कारैः, पुरस्कृता जाता। महाराष्ट्रप्रदेशे जना माई, माँ मदर टेरेसा इत्यादिभिः सम्मानसूचकसम्बोधन वचनैरस्याः सम्मानं कुर्वन्ति। सिन्धुताई महाभागया सञ्चालिता अनेके आश्रमाः पुणे, वर्धा, सारवाडा आदि स्थानेषु अशरणानां संरक्षणाय कार्ये संलग्नाः सन्ति। सामाजिककार्यैः सह साहित्यिकगतिविधिष्वपि सिन्धुताई महा-भागायाः प्रवेशोऽस्ति। आत्मचरित्र मी वनवासी इति रचना अस्मिन् प्रसंगे उल्लेखनीया वर्तते। 2010 तमे वर्षे मी सिन्धुताई सपकाल इति नाम्ना मराठी चित्रपटस्य निर्माणं कृतं अस्मिन् चित्रपटे सिन्धुताई महाभागाया जीवनस्य विशदवृतान्तं विस्तरेण प्राप्यते। 71 वर्षीय वयस्यपि सिन्धुताई आश्रमाणां सुव्यवस्थायै अनवरतगत्या सावहिता दृश्यते। आत्मनो नाम धन्यं कुर्वती सिन्धुताई लोके प्रेरणीया वर्तते।

## हिन्दी अनुवाद

कभी भोजन, वस्त्र, शयन आदि जीने के लिए अनिवार्य साधनों की पूर्ति के लिए रेलवे स्टेशन पर हाथ फैलाकर भीख माँगने वाली अपने शील की रक्षा के लिए रात्रि में निर्जन श्मशान में सोने वाली सिन्धुताई अपने अपूर्व त्याग, समर्पण एवं औदार्य के कारण आज हजार से भी अधिक अनाथों की शरणदात्री, मदर टेरेसा सम्मान से सम्मानित होकर न केवल महाराष्ट्र प्रदेश में अपितु समस्त विश्व में विख्यात हैं। अनाथों की सेवा के लिए संकल्पवती सिन्धुनाम को सार्थक करने वाली सिन्धुताई ने 14 नवम्बर 1948 ई. में महाराष्ट्र प्रदेश के एक गाँव में अभिमान साठे नामक ग्वाले के घर में अवाञ्छित कन्या के रूप में जन्म ग्रहण किया। घर से चिन्धीफटा चिथड़ा नाम से पुकारी जाने वाली बाद में सिन्धुताई नाम से प्रसिद्ध सिन्धुताई परिवार में उपेक्षिता कन्या थीं धन के अभाव एवं अन्य अनेक कारणों से इन्होंने चौथी कक्षा पर्यन्त ही शिक्षा प्राप्त की तदनन्तर 10 (दस) वर्ष की अवस्था में ही बालिका वधू सिन्धुताई का विवाह तीस (30) वर्ष की आयु वाले वर हरी सपकाल के साथ सम्पन्न कर माता पिता अपने कर्तव्य से उऋण हो गए। पति के घर में गृह कार्य को पूर्णकर सिन्धुताई धन प्राप्ति के लिए मजदूरी करती थी। कार्यस्थल पर ठेकेदार पैसे देने के समय मजदूरों का शोषण करता था। स्वाभिमानिनी सिन्धुताई ने ठेकेदार की इस बुरी आदत के विषय में मालिक के कान में सूचना पहुँचा दी अपनी इस शिकायत से ठेकेदार अत्यन्त क्रुद्ध हुआ, और परिणाम स्वरूप उसने सिन्धुताई के पति को विवश करके सिन्धुताई को जबरदस्ती घर से निकलवा दिया। निष्कासन के समय सिन्धुताई का प्रसवकाल समीप ही था। अपने पति के द्वारा किए गए क्रूर कर्म से कम्पित एवं किंकर्तव्यविमूढ सिन्धुताई ने सहसा तो मृत्यु को ही अपने मुक्ति का उपाय माना किन्तु फिर गर्भ में स्थित शिशु के विषय में कुछ सोचकर धैर्य धारण कर मार्ग से एक गौशाला में प्रवेश किया और वहीं एक पुत्री को जन्म दिया तदनन्तर साहस बटोरकर माता के घर की ओर प्रस्थान किया। किन्तु माता के घर के द्वार बन्द पाकर असहाया, अनन्यगतिका सिन्धुताई अपना पेट भरने के लिए रेलवे स्टेशन पर भीख माँगने लगी। वहाँ स्टेशन पर धरती और आकाश के संरक्षण में जीवन बिताने वाले अपने अङ्गों से विविध प्रकार का अभिनय करने एवं हास्य वचनों से मार्ग में आने जाने वाले राहगीरों का मनोरंजन करने वाले बेसहारा बालकों को देखकर करुणा सिन्धु 'सिन्धुताई' उन बालकों के संरक्षण के लिए संकल्पबद्ध हो गई। उस समय से ही अनाथ बालकों का संरक्षण उनका जीवन क्रम बन गया। सिन्धुताई के परिवार में आज 1050 बालक, 207 जमाता, 368 बहुऐं, हजारों पोते पोती सुख से रहते हैं। आश्रम में रहने वाले बालकों को दिनचर्या में कहीं भेदभाव न हो इस दृष्टि से सिन्धुताई ने अपनी पुत्री को अन्य आश्रम में भेज दिया था। समुचित देखभाल से पली हुई वह कन्या आज प्रतिष्ठिता वकील है। इसके अतिरिक्त आश्रमवासी बालकों में भी अनेक बालक आज उच्च पदों पर कार्यरत हैं। सेवाक्षेत्र में अपने अपूर्व योगदान के कारण सिन्धुताई प्रायः 273 राष्ट्रिय, अन्तर्राष्ट्रीय पुरस्कारों से पुरस्कृत हैं। महाराष्ट्र निवासी, माई, माँ, मदर टेरेसा आदि सम्मानसूचक वचनों से सिन्धुताई को सम्बोधित करते हैं। सिन्धुताई द्वारा संचालित अनेक आश्रम पुणे, वर्धा साखाड़ आदि स्थानों पर अनाथों के संरक्षण में संलग्न हैं। सामाजिक कार्यो के साथ साहित्यिक गतिविधियों में भी सिन्धुताई की विशिष्ट रुचि है। इस सन्दर्भ में ''आत्मचरित्र मी बनवासी'' रचना उल्लेखनीया है। 2010 ई. में 'मी सिन्धुताई सपकाल' नामक चित्रपट का निर्माण किया गया जिसमें सिन्धुताई के विषम जीवन का विशद प्रदर्शन हुआ है। 71 वर्ष की अवस्था में आज भी सिन्धुताई अनाथाश्रमों की व्यवस्था के लिए निरन्तर सजग है। अपने नाम को धन्य करने वाली सिन्धुताई लोक में प्रेरणीया हैं।

**-सी-276, भाभा मार्ग, तिलकनगर, जयपुर**

## आयुर्वेद-स्तम्भः

# हृद्देशेऽर्जुनस्तिष्ठति

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**शरीरेन्द्रियसत्त्वात्मसंयोगात्मकेऽस्मिन् मानव-शरीरे सर्वाण्यङ्गप्रत्यङ्गानि महत्त्वपूर्णानि भवन्ति, पुनरपि कानिचिदङ्गानि तु विशिष्टान्येव भवन्ति। तानि सर्वाण्येव स्वे स्वे स्थाने तिष्ठन्ति स्वं स्वं कार्यं नियतया शक्त्याऽऽवश्यकरूपेण कुर्वन्ति। एषः भवति स्वभावो तेषां स्वाभाविकानां शरीराङ्गा-नाम्। यदा हि स्वभावे व्यतिक्रमो भवति विभिन्नैर्हेतुभिस्तदा शरीरे धातुवैषम्याद् विकाराः भवन्ति। एते विकाराः यदि विशिष्टेषु स्थानेषु विशिष्टैर्हेतुभिर्भवन्ति तदा कृच्छ्रस्वरूपात्मका भवन्ति।**

शरीर, इन्द्रिय, मन और आत्मा के संयोग वाले इस मनुष्य शरीर में सभी अंग और प्रत्यङ्ग महत्त्वपूर्ण होते हैं, फिर भी कुछ अंग तो विशिष्ट ही होते हैं। वे सभी अपने-अपने स्थान पर रहते हुए अपना अपना कार्य नियत रूप से नियत शक्ति से आवश्यक रूप से करते हैं। यह उन शरीर के स्वाभाविक अंग-प्रत्यङ्गों का स्वभाव होता है। जब स्वभाव में अनेक कारणों से किसी प्रकार का उल्लंघन होता है, तब शरीर में धातुवैषम्य होने के कारण रोग होते हैं। ये विकार यदि विशिष्ट कारणों से विशिष्ट स्थानों पर होते हैं, तब कृच्छ्रस्वरूप के होते हैं।

**विशिष्टेष्वप्येतेष्वङ्गेषु त्रीण्यङ्गान्यतिविशिष्टानि भवन्ति, तानि हि हृदयं, बस्तिः शिरश्च मर्म-स्वरूपाणि विशेषेण प्राणाश्रयत्वात् प्रधानभूतानि भवन्ति। अत्र चेतनानिबन्धवैशेष्यं भवत्यत एव प्राणाश्रयत्वं संस्वीकृतम्। यस्माद् हृदयाद्युपघातेन विशेषतः प्राणोपघातो भवति, तस्माद् हृदयाद्याश्रिता प्राणा उच्यन्ते, तथा भित्त्युपघातोपहन्यमानं चित्रं भित्त्याश्रयमुच्यते। त्रिष्वेतेषु मर्मसु ये गदा भवन्ति, ते मर्मस्थानोद्भवत्वादसूनपि पीडयन्त्यत एव महागदा इति सञ्ज्ञां लभन्ते।**

इन विशिष्ट अंगों में भी तीन अङ्ग अति विशिष्ट होते हैं। वे हृदय, बस्ति और सिर हैं, जो कि प्राणाश्रय स्वरूप के होने के कारण मर्मस्वरूप के होते हैं और प्रधान भी होते हैं। यहां इस शरीर में इन विशिष्ट अंगों से चेतना का संपर्क विशेष रूप से रहता है, इसलिए इन में प्राणाश्रयत्व स्वीकृत किया गया है। क्योंकि हृदय आदि के उपघात से विशेष रूप से प्राणों का उपघात अर्थात् नाश होता है इसलिए प्राण हृदयाद्याश्रित कहे जाते हैं। जैसे कि दीवार पर उपघात करने पर उससे उपघातित किया गया पीड़ित होता हुआ चित्र भी दीवार के आश्रित कहा जाता है इन तीनों में जो रोग होते हैं मे मर्मस्थान पर उत्पन्न होने के कारण प्राणों को भी पीड़ित करते हैं, इसलिए वे महागद इस संज्ञा को प्राप्त करते हैं।

**सामान्यतया चिन्ताभयक्रोधगदातिचाराः हृद्रोगकारका भवन्ति, वर्तमानकाले त्वेतेषां हेतूनां सर्वव्यापकता वर्तते। एतदतिरिक्तं विरुद्धभोजनं पूनिसङ्कीर्णपर्युषितात्मकं भोजनङ्कुर्वन्ति जनाः। अध्यशनस्यातीतकालभोजनस्य देशकालविरुद्ध-स्य क्रमविरुद्धस्य च भोजनस्य तथा भोजन-नियमानामननुपालनस्य चाप्यत्यधिकं प्रचलनं सञ्जातम्। सम्पन्नास्त्वत्यादानङ्कुर्वन्त्यत एव शरीरगौरवमावहन्ति, शरीरगौरवाच्छ्रममापद्यमाना अलसीभूतास्ते शयनासनं विशेषेण भजन्ति, चङ्क्रमणं व्यायामञ्च त्यक्त्वा सञ्चङ्कुर्वन्ति शरीरे क्लेदस्वरूपाणां किट्टानां मेदः प्रधानानामाम-स्वरूपाणां धातूपधातूनाञ्च।**

सामान्यतया चिंता, भय, क्रोध और रोगों में अतिचार अर्थात् किसी औषधि का विकृत स्वरूप के प्रभाव होने पर (सही प्रकार से चिकित्सा न करने पर) ये सब हृदय रोग को उत्पन्न करने वाले होते हैं। वर्तमान काल में तो इन

हेतुओं की सर्व व्यापकता है। इसके अतिरिक्त लोग विरुद्ध भोजन, सड़ा हुआ भोजन और संकीर्ण स्वरूप का भोजन (पिज्जा बर्गर आदि) तथा बासी भोजन करते हैं। अध्यशन अर्थात पहले का भोजन पचने से पहले ही दूसरा भोजन कर लेना (या कुछ खा लेना), अतीत काल भोजन अर्थात् भोजन का समय निकल जाने के बाद भोजन करना, देश के स्वभाव के विरुद्ध तथा काल के विरुद्ध भोजन करना और क्रम के विरुद्ध भोजन करना (अर्थात् शौचादि से निवृत्त हुए बिना भोजन करना एवं उसके बाद शौच आदि से निवृत्त होना क्रम विरुद्ध भोजन है), भोजन के नियमों का पालन नहीं करना इत्यादि का प्रचलन हो गया है। जो अत्यादान करते हैं अर्थात् बहुत अधिक भोजन करते हैं या संतर्पण करने वाला भोजन करते हैं, इसलिए वे शरीर में गौरव को अर्थात् भारीपन को प्राप्त करते हैं। शरीर के गौरव से थकान को प्राप्त करने वाले आलसी वे लोग विशेषरूप से शयन और बैठे रहना करते हैं। चंक्रमण और व्यायाम को छोड़कर वे अपने शरीर में क्लेदस्वरूप से विभिन्न प्रकार के मलों को संचित करते हैं और मेदस् प्रधान आम स्वरूपक धातु और उपधातुओं का संचय करते हैं।

**अव्यवस्थितरूपेण शरीराणि परिपाल्यमाना अभिद्रोहाभिध्याऽनृतवचनादिषु प्रवीणास्ते (अभिद्रोहः परपीडार्था प्रवृत्तिः, अभिध्या मनसा पराभिद्रोहचिन्तनं, यदि वा परद्रव्यविषये स्पृहा) कामक्रोधमानद्वेषपारुष्याभिघातभयतापशोक-चिन्तोद्वेगादिषु प्रवृत्ताः भवन्ति। तेन ह्याहार-विहारै-रयथापूर्वमुपष्टभ्यमानानि (धातुसाम्येन अयथापूर्वं पाल्यमानानि) तेषामनवहितात्मनां जनानां शरीराणि प्राथमिकरूपेण हृद्रोगैराक्रान्तानि भवन्ति।**

अव्यवस्थित रूप से शरीरों का परिपालन करते हुए वे अभिद्रोह अर्थात् परपीडार्था प्रवृत्ति, अभिध्या अर्थात् मन से किसी का बुरा सोचना अथवा परद्रव्यविषय में स्पृहा (दूसरे का धन लेने की इच्छा करना) झूँठ बोलना और काम, क्रोध, मान, द्वेष, कठोरता, चोट पहुँचाना, भय दिखाना या स्वयं भयभीत होना, ताप (मानसिक सन्ताप) और शोक, चिंता तथा मानसिक उद्वेग आदि में प्रवृत्त होते हैं, जिस के कारण आहार विहारों के द्वारा पहले की तरह परिपालित नहीं होते हुए (अर्थात् धातुओं को समान रूप से रख कर पहले की तरह पालन करने के स्वभाव वाले नहीं होते हुए) (आहार-विहार जिनके सभी नहीं है ऐसे) उन असावधान लोगों के शरीर प्राथमिक रूप से हृद्रोगों से आक्रांत होते हैं।

**ये तु श्रमशीलाः व्यायामचङ्क्रमणादिषु च निरताः सन्ति किन्तु चिन्ताशोकमनोद्वेगादिभिः ग्रस्ताः व्यवसाये दत्तचित्ताः परिग्रहलोभादिभिः सम्पृक्तास्ते सहसा इष्टस्य लाभाल्लाभाच्चानिष्टस्य मानसविकारैस्त्रस्ताः सद्य एवाल्पैरपि हेतुभिः हृद्व्याधिभिः पीडिताः भवन्ति। अत एव हेतोरसेवाऽऽवश्यकी वर्तते।**

जो लोग श्रमशील हैं तथा व्यायाम एवं घूमने आदि में लगे रहते हैं लेकिन फिर भी चिंता, शोक, मनके उद्वेग एवं मानसिक तनाव आदि से ग्रस्त व्यवसाय में दत्तचित्त परिग्रह (धनसंग्रहण) एवं लोक इत्यादि से युक्त हुए वे सहसा अभीष्ट का लाभ होने से अर्थात् सहसा प्राप्त होने से एवं सहसा अनिष्ट के प्राप्त होने से दोनों में से किसी के भी प्राप्त होने पर अर्थात् सहसा प्राप्त होने पर वे मानसिक विकारों से पीड़ित (होकर) शीघ्र ही थोड़े से भी हेतुओं से हृदय-रोगों से पीड़ित हो जाते हैं। इसलिए हेतु का सेवन न करना परम आवश्यक है।

**स्वास्थ्यसंरक्षणक्रमे तु हृद्बलप्रदानामौषध-कल्पानां सेवनङ्करणीयम्। आयुर्वेदे तु हृद्यानां भेषजानां बाहुल्यं वर्तते, येषां सेवनेन कदाचित् सहसा हृद्रोगानामाक्रमणं न भवति। हृद्रोगेष्वर्जुनस्य प्रयोगो येन केन प्रकारेणापि कृतः सर्वदा सुखद एव भवति। स्वस्थेन रुग्णेन वा प्रयुक्तोऽर्जुनः स्वगुण-स्वरूपैः निशितैः शरैराच्छाद्यावरणङ्कृत्वा रक्षति**

**हृदयम्। यावद्विभिन्नाभिः कल्पनाभिः सुसिद्धः हृद्देशेऽर्जुनस्तिष्ठति तावद् हृद्रोगकर्तृभि-रक्षौहिणी-समसंख्याकैरपि हेतुभिर्न हृद्रोगोऽभिजायते।**

स्वास्थ्य के संरक्षण के क्रम में तो हृदय को बल प्रदान करने वाले औषध-कल्पों का सेवन करना चाहिए। आयुर्वेद में तो हृदय के लिए हितकर औषधियों की अधिकता है जिनके सेवन से कदाचित् (कभी-कभी) सहसा हृद्रोगों का आक्रमण नहीं होता है। हृदय के रोगों में जिस किसी भी प्रकार से किया गया **अर्जुन** का प्रयोग सर्वदा सुख देने वाला ही होता है। स्वस्थ व्यक्ति के द्वारा या रोगी के द्वारा प्रयुक्त किया गया अर्जुन अपने गुण स्वरूपक तीखे बाणों से हृदय को ढक कर आवृत करके हृदय की रक्षा करता है। जब तक अनेक कल्पनाओं से सुसिद्ध अर्जुन हृदय प्रदेश में स्थित रहता है, तब तक हृदय रोग को करने वाले अक्षौहिणी सेना के समान संख्या वाले हेतुओं से भी हृदय-रोग नहीं होता है।

**अर्जुनप्रयोगप्रसङ्गे पूर्णरूपेण समुचितमेतद्व-चनम्, यत् केवलमौषधस्वरूपिणमर्जुनमेवोद्दिश्य कथनीयं वर्तते-**

**यस्य भेषजरूपेण हृद्देशेऽर्जुनस्तिष्ठति, वारयन् हृद्रोगान् सः स्वास्थ्यं यच्छति सर्वदा। अतो हे मानव! सर्वभावेन तमर्जुनमेव शरणं गच्छ, तत्प्रसादात् परां हृद्रोगवारणीं शान्तिं प्राप्स्यसि। प्रसङ्गवशादत्र तु हेमन्ते सेवनीयौ हृद्बलदावर्जुनेन विनिर्मितौ शरीरं पुष्टिदौ द्वौ विशिष्टकल्पनात्मकौ योगौ लिख्येते -**

**अर्जुन के प्रयोग के प्रसंग में यह वचन पूर्ण रूप से उपयुक्त है तो केवल औषध-स्वरूपी अर्जुन को ही ध्यान में रखकर कथनीय है-**

जिसके भेषज रूप से हृदय-प्रदेश में अर्जुन रहता है, वह हृदय रोगों को हटाता हुआ (उन से बचाता हुआ) सर्वदा स्वास्थ्य प्रदान करता है। इसलिए हे मनुष्य! हर तरह से उस अर्जुन की ही शरण में जा, उसकी कृपा से हृदय रोगों से बचाने वाली श्रेष्ठ शांति को प्राप्त करेगा। प्रसंगवश यहां हेमंत ऋतु में सेवनीय हृदय को बल देने वाले और शरीर को पुष्टि देने वाले अर्जुनचूर्ण से बनाए गए दो विशिष्ट कल्पनास्वरूपक योगों को लिखा जा रहा है।

**गोधूमार्जुनसंयाव :-**

**हेमन्ते जाठराग्नेर्बलमुत्कृष्टतमं भवत्यत एवाग्निं समीक्ष्य पुष्टिकारकाणां बलप्रदानां गुरुस्निग्धात्म-कानामाहाराणां प्रयोगः करणीयः, कालेऽस्मिन्नेष एव सुखावहो भवति। ये हि भिन्न-भिन्नरोगैर्ग्रस्ताः भवन्ति तैरपि तत्तद्रोगापहारकैर्द्रव्यैर्विनिर्मितानां संयावपाकावलेहादीनां गरिष्ठस्वरूपात्मिकानां च कल्पनानां प्रयोगः करणीयः। हृद्रोगेऽर्जुनप्रयोगः श्रेष्ठो भवत्यत एव ये हि हृद्रोगेण ग्रस्ताः सन्ति तैस्त्वर्जुननामकेन प्रमुख-द्रव्येण विनिर्मितस्य गोधूमार्जुनसंयावस्य प्रयोगः करणीयः।**

हेमंत ऋतु में जाठराग्नि का बल श्रेष्ठ रहता है, इसलिए अग्नि को देखकर पुष्टि करने वाले और बल प्रदान करने वाले गुरु-स्निग्धस्वरूपक आहारों का प्रयोग करना चाहिए। इस काल में यही सुखकारक होता है। जो लोग भिन्न-भिन्न रोगों से ग्रस्त होते हैं उनके द्वारा भी उन उन रोगों को दूर करने वाले द्रव्यों से बनाए गए हलुआ, पाक, अवलेह इत्यादि गरिष्ठ स्वरूप की कल्पनाओं का प्रयोग किया जाना चाहिए। हृदय रोग में अर्जुन का प्रयोग श्रेष्ठ होता है, इसलिए जो लोग हृदय रोग से पीड़ित हैं उनके द्वारा अर्जुन नामक प्रमुख द्रव्य से बनाए गए गोधूम अर्थात् गेहूं के आटे और अर्जुन के चूर्ण से निर्मित हलुए का प्रयोग करना चाहिए।

**50 ग्रामपरिमितं गोधूमचूर्णं समादाय 50 ग्रामपरिमिते गोघृते तस्य भर्जनं करणीयं, ततश्च 300 मिलिलिटरपरिमितमजादुग्धमुष्णमेव तत्र प्रक्षिप्य संयावविधिना सम्यक् परिपच्योचिते समये 75 ग्रामपरिमितां न्यूनां वा शर्करां प्रक्षिप्य चुल्लिकातो-ऽवतारयेत्, ततश्च सद्य एव ग्रामत्रय-परिमितमर्जुन-**

**चूर्णं किञ्चिन्मात्रञ्चैलाचूर्णं प्रक्षिप्यालोडनं सम्यग्विधाय मिश्रणङ्करणीयम्।**

यहां गोधूम और अर्जुन की छाल के चूर्ण से बनाए गए हलुए की विधि को लिखा जा रहा है। जैसे 50 ग्राम गेहूं का आटा लेकर 50 ग्राम गाय के घी में उसको भूनना चाहिए। उसके बाद 300 मीलीलिटर मात्रा में बकरी का गर्म दूध लेकर उसे डालना चाहिए। हलुए के बनाने की विधि से अच्छी प्रकार से परिपाक करके उचित समय पर 75 ग्राम परिमाण में या उससे कम शर्करा उसमें डालकर चूल्हे से उतार लेना चाहिए। उसके बाद शीघ्र ही 3 ग्राम परिमाण में अर्जुन का चूर्ण और थोड़ी सी इलायची का चूर्ण डालकर अच्छी तरह हिलाकर मिश्रण कर देना चाहिये।

**स्वतः शीतीभूते तस्मिन् संयावे 10 ग्रामपरिमितं मधु सम्मिश्र्य रुचिपूर्वकम्भक्षणङ्करणीयम्। प्रतिदिनं कल्ये कल्येन कल्याश एषः कल्यार्थं परिकल्पनीयः भक्षणीयश्च। आहिताग्निः यः प्रातः सायं च मात्राकालौ विचारयन् गोधूमार्जुनसंयावमन्तरग्नौ जुहोत्यन्येषाञ्चोपयुक्तानामाहारविहाराणां सेवनङ्करोति पानभोजने सात्म्यज्ञः निःश्रेयसे युक्तः स ना हृद्रोगान्नैवाप्नोति।**

स्वतः शीतीभूत उस हलुए में 10 ग्राम मधु मिला कर रुचिपूर्वक भक्षण करना चाहिये। प्रतिदिन प्रातःकाल स्वस्थ व्यक्ति के द्वारा यह कलेवा अर्थात् प्रातःकालीन यह भोजन स्वस्थ रहने के लिए परिकल्पित करना चाहिए अर्थात् बनाना चाहिए और खाना चाहिए। सात्म्य आहार से जिसने व्यवस्थित कर ली है अग्नि ऐसा आहिताग्नि व्यक्ति जो प्रातः और सायंकाल मात्रा और काल का विचार करते हुए गोधूम चूर्ण और अर्जुन चूर्ण के सम्मिश्रण से बनाए गए हलुए को अंतरग्नि में आहुति देता है अर्थात् प्रयुक्त करता है तथा अन्य उपयुक्त आहार विहार का पान और भोजन में सेवन करता है, ऐसा सात्म्य को जानने वाला कल्याणकारी भाव में जुड़ा हुआ वह मनुष्य हृदय-रोगों को प्राप्त नहीं करता है।

**यमके विनिर्मितः गोधूमार्जुनसंयावः-**

**50 ग्रामपरिमितं गोधूमचूर्णं समादाय 35 ग्रामपरिमिते गोघृते 15 ग्रामपरिमिते च तैले ( सात्म्यानुरूपे न्यूनमात्रेऽपि वा समुचिते स्नेहे ) तस्य भर्जनं करणीयम्, ततश्च 50 ग्रामपरिमितं गुडं सम्मिश्र्य विनिर्मितस्योष्णोदकस्यास्मिन् भर्जिते गोधूमचूर्णे प्रक्षेपणङ्कृत्वा परिपाकं विधायोचिते समये चुल्लिकातोऽवतरणङ्कृत्वा ग्रामत्रय-परिमितमर्जुनचूर्णं सम्यक् विमिश्र्योष्णस्वरूप एव भक्षणमस्य संयावस्य कृत्वोष्णमेव पयोऽनुपिबेत्।**

**ये हि मधुमेहपीडिताः सन्ति येषाञ्च स्नेहं प्रत्यसात्म्यता वर्तते, ते तु येन केन प्रकारेणापि पार्थचूर्णं गृह्णीयुः। अग्रिमे हि कस्मिंश्चिल्लेखेऽर्जुन-प्रयोगपरकानां योगानामुल्लेखं करिष्यामि।**

यमक (घी एवं तैल) में बनाया गया गेहूं के आटे एवं अर्जुन चूर्ण का हलुआ-

50 ग्राम गेहूं का आटा लेकर 35 ग्राम गोघृत एवं 15 ग्राम तैल लेकर (सात्म्य या अनुकूल जिस तरह से रहता है उसके अनुरूप घी एवं तैल कम मात्रा में भी लिए जा सकते हैं, उसमें) उस गोधूम के आटे को भूनना चाहिए। उसके बाद 50 ग्राम गुड मिलाकर बनाए गए उष्णोदक का इस भुने हुए गेहूं के आटे में प्रक्षेपण करके अर्थात् डालकर परिपाक करके उचित समय पर चूल्हे से उतारकर 3 ग्राम की मात्रा में अर्जुन का चूर्ण अच्छी तरह से मिलाकर इस हलुए का गर्म गर्म रूप में भक्षण करना चाहिए। उसके बाद अनुपान रूप में गर्म दूध पीवे। जो लोग मधुमेह से पीड़ित हैं या जिनकी स्नेह के प्रति असात्म्यता है अर्थात् स्नेह नहीं ले सकते, वे तो किसी भी प्रकार से अर्जुन के चूर्ण को लेवें। अग्रिम किसी लेख में अर्जुन के प्रयोग-संबंधी योगों का उल्लेख करूंगा।

**80, सेनापति हाउस के पीछे**
**प्रेमनगरम्, झोटवाड़ा, जयपुरम्**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/405/2018-20

हार्दिक शुभकामनाओं सहित :-

# ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़ें

(हिन्दी) साप्ताहिक
पाञ्चजन्य

(English) Weekly
ORGANISER

हमारी विशेषताएं



- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा



You can subscribe Panchjanya/Organiser Weeklies online through our
Websites: www.panchjanya.com, www.organiser.org

वार्षिक ग्राहक शुल्क
भारत में ₹ 700/- पाञ्चजन्य • ₹ 800/- ORGANISER (साधारण डाक द्वारा)
विदेशों में $ 80 (विदेशों में हवाई डाक द्वारा)

प्रसार विभाग
भारत प्रकाशन (दिल्ली) लिमिटेड
2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली- 110055
फोन : 011-47642000,01,02, ई-मेल: circ@bpdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,